देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरस्य त्रैमासिकी वार्तापत्रिका

# रघुनाथवार्तावली

## नवनिदेशक-सपर्या-विशेषाङ्कः

षष्ठवर्षम् (अङ्काः 19, 20) जनवरी-मार्च, अप्रैल-जून 2021

प्राध्यापकैश्च छात्राणां प्रारम्भान्मार्गदर्शनम्।
वरिष्ठाचार्यरूपेण कृतमेवात्र सर्वथा।।

नवदिशा-प्रदानेन परिसराय साम्प्रतम्।
निदेशकस्य दायित्वं मुदा निभालयन्ति च।।




स्थित्वा न्यायोचिते मार्गे प्रगतिश्च यथा भवेत्।
तदर्थं यत्नशीलास्ते दृश्यन्तेऽत्र दिवानिशम्।।
केवलं बाह्यसौन्दर्यं परिसरे न काङ्क्षते।
अन्तस्सौन्दर्यमप्यत्र ह्यावश्यकं पदे पदे।।

**(प्रो.बनमाली बिश्वालः)**

नानाविषयसम्बद्धाः नानारसपरिप्लुताः।
परिसरीयवार्तास्ताः वार्तावल्यां प्रकाशिताः ।।

रघुनाथवार्तावली कृपया श्रीरघुनाथस्य प्रसरेत्।
दिशि दिशि प्रापयेदथ वार्ताः परिसरस्याभिनवाः।।

प्रकाशनवर्षम् - 2021
















**प्रधान-सम्पादकः**
प्रो. बनमालीबिश्वालः
(परिसर-निदेशकः)

**सम्पादकः**
डॉ.अनिलकुमारः

**संपादकमण्डलम्**
डॉ.शैलेन्द्रप्रसादउनियालः
डॉ.श्रीओमशर्मा
डॉ.सुरेशशर्मा
डॉ.दिनेशचन्द्रपाण्डेयः
श्रीपंकजकोटियालः

**लिपिचित्रसंयोजनम्**
श्रीनवीनकुमारः

रघुनाथवार्तावली-समबद्धमभिप्रायम्, प्रकाशनयोग्याः कार्यक्रमवार्ताः च अधोलिखित—ईमेल् संङ्केतेन प्रेषयन्तु - srkvarta@gmail.com

परिसरस्य जालपुटेऽपि रघुनाथवार्तावल्याः समेऽङ्काः द्रष्टुं शक्यन्ते-
Website: http//csu-devprayag.edu.in/

देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरस्य त्रैमासिकी वार्तावली
Website: http//csu-devprayag.edu.in/

# रघुनाथवार्तावली

**प्रकाशकः**
केन्द्रीय-संस्कृत-विश्वविद्यालय
श्रीरघुनाथकीर्तिपरिसरः
देवप्रयागः, पौडी-गढवालः
उत्तराखण्डः - 249 301
(दूरभाषः - 01378—266028)
Email : srkcampus@gmail.com
Website : http//csu-devprayag.edu.in/
https://www.facebook.com/csusrkcd
https://www.youtube.com/channel/UCjd-WndrwhRtckven8yBeVg

## पुरोवाक्


प्रो.बनमालीबिश्वालः

वार्तावल्यास्तु विंशोऽङ्कश्चोनविंशेन संयुतः।
पञ्चाब्दपूर्तिपूर्वं हि यथायोग्यं प्रकाश्यते ।1।
स्थायिस्तम्भास्समे चात्र यथास्थानं निवेशिताः।
स्थापनादिवसे चास्य लोकार्पणं विधीयते ।2।
पञ्चाब्दपूर्तिमालक्ष्य समारोहश्च कल्पितः।
उत्तराखण्डराज्यस्य विद्यावैभवसंयुतः ।3।
विवरणञ्च सङ्गोष्ठ्याश्चाग्रिमाङ्के प्रदास्यते।
तस्य सङ्केतमात्रञ्च क्रियतेऽत्र प्रसङ्गतः ।4।
त्रैमासिक-स्वरूपत्वाच्चत्वारोऽङ्काश्च वत्सरे।
एवं हि विंशतिश्चाङ्काः पञ्चाब्देषु प्रकाशिताः ।5।
स्वीकृतः कार्यभारश्च मया निदेशकेन वै।
अष्टादशे दिनाङ्के च मासे जनवरौ पुनः ।6।
अङ्कद्वयं तदारभ्य विशेषाङ्के निवेशितम्।
निदेशक-सपर्याऽत्र क्रियते सहकर्मिभिः ।7।
मासेषु पञ्चषेष्वेव कार्यक्रमाश्च येऽभवन्।
तेषां विवरणञ्चात्र संक्षिप्यैव प्रकाशितम् ।8।
आयोजिताश्च कालेऽस्मिन् सङ्गोष्ठयो दशाधिकाः।
अन्ताराष्ट्रस्तरीयाश्च राष्ट्रियास्सन्ति काश्चन ।9।
अन्तर्जालप्रणाल्यैव सङ्गोष्ठयो विभागीयाः।
सर्वाश्चायोजिताः काले सोत्साहञ्च सविस्तरम् ।10।
व्याकरणे च वेदे च सङ्गोष्ठी ज्योतिषे पुनः।
साहित्ये दर्शने भिन्ना गोष्ठी चाधुनिकेऽभवत् ।11।
नैवायोजनमेतासां कोरोणया प्रभावितम्।
इच्छायामेव सत्याञ्च तत्रोपाया भवन्ति वै ।12।
पाण्डुलिप्यनुसन्धान-केन्द्रेणैव विशेषतः।
आयोजिता च सङ्गोष्ठी सम्पादनविधौ पुनः ।13।
बालसाहित्य-सम्बद्धा सङ्गोष्ठी चापरा क्वचित्।
परिसरीय-केन्द्रेण चान्येन समनुष्ठिता ।14।
सङ्गोष्ठी चापरा जाता मातृभाषादिने पुनः।
मातृभाषाश्रितान्यत्र व्याख्यानानि तु कानिचित् ।15।
पर्यावरणसम्बद्धा सङ्गोष्ठी समनुष्ठिता।
पर्यावरणवार्ता च विश्वे प्रसारिता तया ।16।
योगदिवसमालक्ष्य सङ्गोष्ठी चापराऽभवत्।
विशिष्य योग-सिद्धान्ताः सङ्गोष्ठ्याञ्च विचारिताः ।17।
गणतन्त्रदिनात्पूर्वं शुभसन्ध्यावधौ पुनः।
राष्ट्रचेतनसम्बद्धा कविगोष्ठी ह्यनुष्ठिता ।18।
समर्चनञ्च वाग्देव्या वसन्ते नु विधीयते।
परिसरेण सोत्साहं कृतं पूजार्चनं शुभम् ।19।
सञ्जातः पुनरारम्भः निर्माण-कर्मणां यतः।
पूजार्चनात् परं पूर्णः परिसरोऽत्र मोदते ।20।
नूतनाध्यापकानाञ्च नियुक्तिस्समजायत।
वेदे व्याकरणे न्याये ज्योतिषे च विशेषतः ।21।
एवं स्थानान्तरेणैकः प्राध्यापकस्समागतः।
द्वावन्यौ च गतावस्मात् स्तानान्तरस्य कारणात् ।22।
प्रभावितोऽपि कालेन लाभालाभैर्गतागतैः।
सर्वेषां सहयोगेन परिसरस्तु वर्धते ।23।
नेष्यामोऽग्रे वयं सर्वे परिसरञ्च सर्वथा।
कृपया रघुनाथस्य किं न सिद्ध्यति भूतले? ।24।
गङ्गया ज्ञानगङ्गा च देवप्रयाग-सङ्गमात्।
कालात् कालान्तरं यावत् सर्वत्र प्रसरिष्यति ।25।

# सम्पादकीयम्



(डॉ.अनिलकुमार:)

रघुनाथस्य सा मूर्तिर्भक्तानां पुण्यदायिनी।
गङ्गातटे च विभाति  पावने मन्दिरे शुभे।।1।।

परिसरस्य मुख्या ये शास्त्रेषु च कृतश्रमाः।
तेषां बिश्वालवर्याणां क्रियतेऽत्राभिनन्दनम्।।2।।

अङ्कश्चायं सपर्यायै तेषामेव सुसज्जितः।
हर्षयुक्ताः वयं सर्वे येषामेवानुशासने।।3।।

“कार्यमेव हि पूजाऽस्ति” सिद्धान्तेन च दीक्षिताः।
सौभाग्येन तथा लब्धा परिसरे सुशासकाः।।4।।

यथा काव्ये तथा शास्त्रे स्वभावे दक्षता नवा।।
भवत्येवं सभायाञ्च तेषां सदाऽभिनन्दनम्।।5।।

पूर्वमत्र समाख्याता तेषाञ्च कार्यदक्षता।।
येषां पूर्वप्रयासैश्च वार्तावली प्रकाश्यते।।6।।

गणतन्त्रे यथा भाति भारतस्याभिनवाश्च भाः।
राष्ट्रस्य चेतना नित्यं सम्मेलने विराजिता।।7।।

स्वच्छतायाञ्च सम्पन्नं कार्यं सर्वं मनोहरम्।
कृतमत्र समित्या च निर्माणस्य निरीक्षणम्।।8।।

ज्योतिषे चैव सञ्जाता सङ्गोष्ठी सुमनोहरा।
शारदा पूजिता सर्वैः वसन्तोत्सवपर्वणि।।9।।

व्याकरणस्य सङ्गोष्ठ्यां वैदेशिकाः समागताः।
वेदेऽपि संयुताः नैके संस्कृतिरक्षणे रताः।।10।।

मातृभाषादिने पुण्ये सर्वेषां प्रीतिवर्धकाः।
सामाजिकाः समायाताः नूतनानुभवैः सह।।11।।

शब्दशक्तिः कथं भाति साहित्येऽपि नवा नवा।
बोधनाय च सम्पन्ना सङ्गोष्ठीह मनोहरा।।12।।

राष्ट्रवादयुतास्सर्वे चाधुनिकाः गवेषकाः।
समागता विचारार्थं सङ्गोष्ठ्याञ्च  सबान्धवाः।।13।।

न्यायशास्त्रेऽपि सङ्गोष्ठी विद्वद्भिः परिपालिता।
चिन्तनञ्चाद्भुतं जातं विदुषां हितकारकम्।।14।।

छात्राणां च परीक्षार्थं व्यवस्थेह कृता नवा।
सुसम्पन्नञ्च तत्कार्यं समयेन व्यवस्थितम्।।15।

परिसरः परिस्नातश्चौषधिकृतवर्षणैः।
कोरोणाया भयात् सर्वे सुरक्षिताः क्वचित्पुनः।।16।।

समकालिकसाहित्ये बालसाहित्यमाश्रिता।
परम्परा कथं भाति चेति तथ्यं विचारितम्।17।।

पाण्डुलिपेः कथं कार्यं सम्पादनं नवम्बुधैः।
सर्वं विचारितं सम्यक् सङ्गोष्ठ्याञ्च समागतैः।18।।

ग्रीष्मावकाशकाले च साक्षात्कारो ह्यनुष्ठितः।
प्राध्यापकाश्च चत्वारः परिसरे नियोजिताः।।19।।

सङ्गोष्ठी चेह सम्पन्ना पर्यावरणसंयुता।
उपस्थिताश्च विद्वांसो नवविचारसंयुताः।।20।।

योगे चायोजिता गोष्ठी हर्षेण परिपालिता।।
कार्यक्रमाश्च छात्राणां शिक्षकाणाञ्च योजिताः।।21।।

अवशिष्टञ्च यत्कार्यं भवनानाञ्च पूर्त्यै।
तदर्थमर्चितो देवः परिसरे निदेशकैः।।22।।

काव्यं संयोजितं सर्वं नूनमानन्ददायकम्।
नूतनानि तु कार्याणि योजितानि यथामति।।23।।

साक्षात्कारो गृहीतोऽत्र निदेशकस्य नूतनः।
सोऽपि संयोजितोऽस्त्यत्र समेषां ज्ञानवर्धकः।।24।।



**जगन्नाथस्तु मे नाथोऽनाथानां यो जगत्पिता।**
**जेगीयते च तत्कीर्तिः सनाथैस्तस्य सौख्यदा।।**
**रथोत्सवे सुसम्पन्ना रघुनाथीय-पत्रिका।**
**संस्कृतस्य प्राचारार्थं प्रस्तूयते च सा मुदा।।**

# परिसरस्य नवनिदेशकाः



(प्रो.बनमाली बिश्वाल:)

केन्द्रीयसंस्कृतविश्वविद्यालयस्य यथा महिमा भारते विश्वे च विद्यते न तथा अन्यस्य कस्यापि संस्कृतविश्वविद्यालयस्य। सम्पूर्णभारते अस्य परिसराः, तथा केचन आदर्श-महाविद्यालयाश्च सन्ति। संस्कृतस्य सागरोऽयमिति यद्युच्यते तर्हि तत्र नातिशयोक्तिः। सर्वेषां प्राध्यापकानां पदोन्नतिः, स्थानानन्तरणञ्चेत्यादिवैशिष्ट्यमत्र विद्यते। वस्तुतः परिसरस्य मुख्यं दायित्वमपि यो निर्वहति, योग्यताक्रमेण च कालक्रमेण तस्यापि परिवर्तनं भवति। श्रीरघुनाथकीर्तिपरिसरे सर्वप्रथमं प्रो.सर्वनारायणझामहोदयाः प्राचार्यत्वेनात्र 2016 तमे वर्षे समागताः। मासद्वयपर्यन्तमत्रोषित्वा च ते स्थानान्तरिता अभवन्। तदनन्तरं द्वितीयक्रमे प्रो.के.बी.सुब्बरायुडुमहोदयैरत्र प्राचार्यपदमलङ्कृतम्। तेषां प्रयासेन परिसरस्य भवननिर्माणकार्यम् अग्रे सृतम्। अगस्त 2016 तः 18-01-2021 दिनाङ्कपर्यन्तं ते परिसरेऽस्मिन् स्वकर्तव्यस्य पालनं कृतवन्तः। 18-01-2021 तमे दिनाङ्के परिसरस्यास्यैव व्याकरणविभागाध्यक्षाः दर्शन-व्याकरण-साहित्यमर्मज्ञाः लब्धप्रतिष्ठाः कवयः कथाकाराः प्रो.बनमालीबिश्वालमहोदयाः निदेशकपदमलङ्कृतवन्तः। पूर्वनिदेशकेन प्रो.के.बी.सुब्बरायुडुमहोदयेन परिसरस्य कार्यभारः नवनिदेशकेभ्यः प्रो.बनमालीबिश्वालमहोदयेभ्यः समर्पितः। अवसरेऽस्मिन् परिसरस्य सर्वे आचार्याः प्राध्यापकाः प्रो.विजयपालशास्त्रि-डा.सच्चिदानन्दस्नेही-डा.आर.बालमुरगन-डा.कृपाशङ्करशर्म-डा.अनिलकुमार-डा.शैलेन्द्रप्रसादउनियाल-डा.अरविन्दगौर-डा.सुरेशशर्म-डा.दिनेशचन्द्रपाण्डेय-डा.अवधेशचन्द्रबिजल्वाण-डा.श्रीओमशर्म श्रीनवीन-डोबरियालप्रभृतयस्तथा कार्यालय-सदस्याश्चोपस्थिता आसन्। प्रो.बनमालीबिश्वालमहोदयाः परिसरेऽस्मिन् तृतीये क्रमे निदेशकरूपेण कार्यभारं गृहीतवन्तः। एते न केवलं दर्शनव्याकरणशास्त्रमर्मज्ञाः, अपितु काव्यप्रपञ्चरचनाचतुरा अपि विद्यन्ते। आचार्य-बिश्वालमहोदयानां जीवनमत्यन्तं सरलं किन्तु वैदुष्यञ्चाद्वितीयम्। एतेषां व्यक्तित्वं कृतित्वञ्च संक्षिप्ततयाऽत्र पाठकानां सौविध्यार्थं प्रस्तूयते-

| | |
|---|---|
| पिता | स्व.नारायणबिश्वालः। |
| माता | स्व. सत्यभामाबिश्वालः। |
| जन्मतिथिः | ४-५-१९६१। |
| जन्मतीर्थम् | ग्रामः – तेलिआ, पो.- हाटसाहि, वाया- शङ्खचिला, जि.याजपुरम्, ओडिशा। |
| स्थायिनिवासः | ५७, वसन्तविहारः, झूसी, प्रयागराजः- २११०१९ । |
| कर्मतीर्थम् | आचार्यः तथा व्याकरणविभागाध्यक्षश्च, केन्द्रीय-संस्कृत-विश्वविद्यालयः, श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः, उत्तराखण्डः - २४९३०१। ततः पूर्वं ते प्रयागस्थे गङ्गानाथझापरिसरे आचार्यरूपेण आसन्। |
| शिक्षा | शास्त्री-राष्ट्रिय-संस्कृत-संस्थानतः, आचार्यः-जगन्नाथ-संस्कृत-विश्वविद्यालयतः, एम.ए., एम.फिल.पी.एचडी.-पुणेविश्वविद्यालयतः। |
| विषय-विशेषज्ञता | व्याकरणम्, वेदः, धर्मः. दर्शनम्, साहित्यम्, आधुनिकसंस्कृतसाहित्यम्, संकृतमूलकं विज्ञानम्, पाण्डुलिपिविज्ञानम्, तथा शोधप्रविधिश्चेत्यादयः प्राच्यार्वाचीनविषयाः। |
| भाषा-दक्षता | संस्कृतम्, हिन्दी, आङ्गलम्, ओडिआ (मराठी-बाङ्गलयोः सामान्यज्ञानम्) । |
| रचना-दक्षता | मौलिकशोधः (समीक्षात्मकः तथा सम्पादनात्मकः)- चतसृषु भाषासु मौलिकसर्जनात्मकरचनाः (कविता, कथा, नाटकम्, उपन्यासः तथा बालसाहित्यम्), अनूदितसर्जनात्मकरचनाः (कविता, कथा, नाटकम्, उपन्यासः, बालसाहित्यम्)। |

1.मौलिकसंस्कृत-कवितासङ्ग्रहाः सङ्गमेनाभिरामा (१९९६), व्यथा (१९९७), ऋतुपर्णा (१९९९), प्रियतमा (१९९९), वेलेण्टाइन्डे-सन्देशः (२०००), दारुब्रह्म (२००१), यात्रा (२००२), वदरीश-शतकम्, लौहपुरुषशतकम्, प्रतिवेशि-शतकम्, वैष्णोदेवीशतकम्, लोकभाषासंस्कृतामृतम्, प्रयागप्रयाणम्, नवदुर्गायणम्, सोमनाथायनम्, कोरोणायणम्, क्वास्ति मे भारतम् , केदारायणम्, चन्द्रबदनी-महिमामृतम्, जगद्गुरु-चरितामृतम् तथा रघुनाथायनम्,कोटेश्वरायणम् ।

2.मौलिकसंस्कृत- महाकाव्यम् महात्ममाहात्म्यम् (महाकाव्यम्) तथा देवभूमिप्रयाणम्।

3.अनूदित-संस्कृत-कवितासङ्ग्रहः तारा अरुन्धती (मूल-गुजराती- उषा उपाध्यायः) विवेकलहरी (मूलम्- आङ्गलं बाङ्गला तथा हिन्दी- स्वामी विवेकानन्दः)।

| | |
|---|---|
| 4.मौलिकसंस्कृत-कथासङ्ग्रहा: | नीरवस्वनः(१९९८), बुभुक्षा(२००१), जगन्नाथचरितम्(२००३), जिजीविषा(२००६)। |
| 5.अनूदितसंस्कृतकथासङ्ग्रहा: | जन्मान्धस्य स्वप्नः (प्रो.अरुणरञ्जनमिश्रस्य ओडिआ-कथानां संस्कृतानुवादः) पद्मजाप्रकाशनम्, प्रयागराजः २०१५। |
| 6.अनूदित-संस्कृत-नाटकम् | पत्रालयः-(रवीन्द्रनाथठाकुरस्य बङ्गालीनाटकस्य डाकघर इत्यस्य संस्कृतानुवादः) पद्मजाप्रकाशनम्, प्रयागराजः २०१५। |
| 7.अनूदित-संस्कृत-कवितासङ्ग्रहः | विवेकलहरी- (स्वामिविवेकानन्दस्य बङ्गाली-आङ्गल-हिन्दीकवितानां संस्कृतानुवादः) पद्मजाप्रकाशनम्, प्रयागराजः २०१६। |
| 8-ओडिआ-कवितासङ्ग्रहः | वञ्चतुमे मो आयुषनेइ (१९९७), कश्चित्कान्ता (२०००)। |
| 9.ओडिआकथासङ्ग्रहः | सकालर मुहँ (२०००)। एतदतिरिच्य एकः संस्कृत-कथासङ्ग्रहः, संस्कृत-नाटकद्वयम्, संस्कृत-उपन्यासद्वयं च प्रकाशनाधीनं वर्तते। |
| 10.शास्त्रीयग्रन्थाः | काव्यतत्त्वसमन्वितिः, हस्तलेखशास्त्रम्, भारतीयदर्शनकारिका, पाश्चात्यदर्शनकारिकादयः। |
| 11.प्रकाशितशोध-ग्रन्थाः | The समासशक्तिनिर्णय of कौण्डभट्ट (१९९५), The concept of उपदेश in Sanskrit Grammar (१९९६), पतञ्जलि as a Philosopher & Grammarian (२००३), भर्तृहरि as a Philosopher and Grammarian (२००६) व्याकरणतत्त्वालोचनम्, PadmajaPrakashan (२००६), Studies on Sanskrit Grammar and Grammatical concepts (२००६), A new approach to Philosophy of Sanskrit Grammar (२००७),Orissan Contributions to Sanskrit Grammar and linguistics(२००७), प्रातिशाख्य-पारिभाषिक-शब्दकोश (२०१५), समकालिक संस्कृत साहित्य की नवीन प्रवृत्तियां (२०२०)। |
| 12-अनूदिताः तथा सम्पादिताश्च शास्त्रीयग्रन्थाः | योगरत्नावली, वाक्यवादः, वाक्यदीपिका, कविरहस्यम्, मनसिजसूत्रम् तथा राष्ट्रिय-संस्कृत-संस्थानस्य दूरस्थशिक्षणसामग्रीरूपेण सिद्धान्तकौमुद्यास्तथा लघु-सिद्धान्त-कौमुद्याश्चेत्यनयोः दश पुस्तकानि प्रकाशितानि। |
| 13-प्रकाशितभाषाशिक्षणपुस्तकानि | राष्ट्रिय-संस्कृत-संस्थानस्य संस्कृतस्वाध्यायसामग्रिरूपेण प्रथमदीक्षायाः पञ्च, द्वितीयदीक्षायाः त्रीणि, तृतीयदीक्षायाश्च पुस्तकद्वयम्, तथा गङ्गानाथझापरिसरात्, प्रयागराजात् पञ्जाबीसंस्कृत-पाठमाला च संयुक्तसम्पादने प्रकाशिता। |
| 14-सम्पादितकाव्यसङ्ग्रहाः | जगन्नाथ-सुभाषितम् (भागद्वयम्), प्रतिध्वनिः, सूक्ति-मुक्तावली, अमृतमन्थनम् इत्यादि। |
| 15-प्रकाशितशोधपत्राणि | १५० शोधपत्राणि विविधपत्र-पत्रिकासु प्रकाशितानि। |
| 16-पुस्तक-समीक्षा: | ६० पुस्तक-समीक्षाः विविधपत्र-पत्रिकासु प्रकाशिताः। |
| 17-शोध-निर्देशनम् | मार्गदर्शने ४० शोधच्छात्रैः शोधोपाधिः (पीएच. डी) प्राप्ता। |
| 18-सम्मेलनम्, सङ्गोष्ठी, कार्यशाला: | १६० ( राष्ट्रियान्ताराष्ट्रीयसम्मेलनेषु पत्रप्रस्तुतिपूर्वकं भागग्रहणम्, एवञ्च बहुत्र सत्राध्यक्षरूपेण व्याख्यानम्) |
| 19-शैक्षिकी विदेशयात्रा | जर्मनी (लाईप्चिक् विश्वविद्यालयः हाईडिलवर्ग-विश्वविद्यालयश्च)। |
| 20-पत्र-पत्रिकासम्पादनम् | दृक् (षाण्मासिकी समकालिकसंस्कृतसाहित्य-समीक्षापत्रिका)- ३१ अङ्काः, कथासरित् (अद्वितीया संस्कृतकथाषाण्मासिकी) - ३१ अङ्काः, जर्नल आफ गङ्गानाथ झा कैम्पस (अन्ताराष्ट्रिय-शोधपत्रिका) - १० अङ्काः, शाब्दीत्रिपथगा ३ अङ्काः, विश्ववारा १ अङ्कः, अन्याश्च पत्रिकाः (उशती, शाश्वती, मधुछन्दा तथा अभिनन्दनग्रन्थाः) – १५ अङ्काः । |
| 21-प्रधान-सम्पादकः | पद्यबन्धा (अद्वितीया संस्कृतकविता-षाण्मासिकी) १८ अङ्काः । |
| 22-पुरोवाक्-आमुखलेखनम् | 20 तः अधिकपुस्तकानां पुरोवाक्(Foreword)-आमुखादि-(Preface) लेखनम्। |
| 23-साक्षात्कारः | १५ तः अधिकलब्धप्रतिष्ठविदुषाम् तथा संस्कृत-रचनाकाराणां साक्षात्काराः स्वीकृताः ये च दृक्-कथासरितादिपत्रिकासु प्रकाशिताः। |

24-विशेषोपलब्धिः सर्जनात्मकरचनाकाररूपेण एतेषां कृतित्वं व्यक्तित्वञ्च इत्यस्मिन् विषये दशाधिकशोधप्रबन्धाः (पीएच.डी.), नैके लघुशोधप्रबन्धाः(एम.फिल.) लिखिताः एवं लिख्यमानाश्च सन्ति। प्रतिष्ठरचनाकाररूपेण स्व-साक्षात्कारः कथासरिदित्यत्र एवं लोकभाषासुश्री-पत्रिकायां च प्रकाशितः। तेषां नैकाः कथाः, कविताः तथा कथासङ्ग्रहाश्च हिन्दी-आङ्ग्ल-तेलुगू-ओडिआ-जर्मन्यादिभिः भाषाभिरनूदिताः।

25-सम्माननम्/पुरस्काराश्च:

-"बाणभट्ट"-पुरस्कारः उत्तरप्रदेशसंस्कृतसंस्थानम्, लखनऊतः।
-"संस्कृत-महामहोपाध्याय"-सम्मानम् (हिन्दीसाहित्यसम्मेलनम् ) ।
-"नव-उर्जा-अभिनन्दनम्"-भारतीयभाषापरिषद्, कोलकातातः ।
- "युवसाहित्यकार"-पुरस्कारः भाउरावदेवसेवान्यासात् लखनऊतः(ओडिआ साहित्यकाररूपेण) ।
-"विविध"-पुरस्काराः उत्तरप्रदेशसंस्कृतसंस्थानतः (नैकधा) ।
-"गोस्वामि-गिरिधरलाल-गद्यरचना"- पुरस्कारः, दिल्लीसंस्कृत-अकादमीतः (वारद्वयं) ।
-"पण्डितराज-जगन्नाथपद्यरचना"-पुरस्कारः, दिल्लीसंस्कृत-अकादमीतः(वारद्वयं) ।
-अखिलभारतीय-मौलिक-संस्कृत-कथारचना-पुरस्कारः,दिल्लीसंस्कृत-अकादमीतः(बहुधा) ।
-अखिलभारतीय-मौलिक-संस्कृत-लघुनाटक-पुरस्कारः, दिल्लीसंस्कृत-अकादमीतः(बारद्वयम्) ।
-अखिलभारतीयसंस्कृत-कथारचना-पुरस्कारः,समस्यापूर्ति-पुरस्कारः,संस्कृतलघुनाटक-पुरस्कारः, उत्तराखण्डसंस्कृत-अकादमीतः।
-उपेन्द्रभञ्ज-सम्माननम् (ओडिआसाहित्यकाररूपेण)भञ्जपीठम्, भुवनेश्वरतः।
-संस्कृत-प्रतिभासम्माननम्, के.के. ओमेन्सकालेज, बालेश्वरतः।

संस्कृत-आङ्ग्ल-ओडिया-हिन्दीभाषासु कविकर्म कुर्वाणाः एते कवयः कथाकाराश्च प्रो. बनमाली बिश्वालमहोदयाः यद्यपि जन्मतः उत्कलीया वर्तन्ते तथापि तेषां कर्मक्षेत्रं प्रयागराजः (इलाहबादः)। अधुना एते महोदयाः केन्द्रीय-संस्कृत-विश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरे, देवप्रयागे निदेशकपदमलङ्कुर्वन्ति।

## बनमाली-पञ्चाशिका

(आचार्यस्य बनमालिनो विश्वालस्य पद्यमयं संक्षिप्तवृतम्)

जन्मना चोत्कलीयोऽपि भारतीयोऽस्ति कर्मणा।
बिश्वालो बनमाल्याख्यस्तद्वृत्तञ्च निरूप्यते।1।
जाजपुरे जनिं लब्ध्वा विद्यायै च पुरीं गतः।
उच्चशिक्षामवाप्तुञ्च सम्प्राप्तः पुण्यपत्तनम्।2।
प्रयागं वृत्तये प्राप्य तत्र वासः प्रकल्पितः।
नाम पद्मालया तस्य चावासस्य समङ्कितम्।3।
प्रतिष्ठानपुरी ख्याता झूसीत्यपरसंज्ञिता।
तत्रैवास्ति तदावासः वसन्ताख्ये विहारके।4।
देवप्रयाग-वासस्तु स्थानान्तरण-कारणात्।
गङ्गा-नाम यतस्साक्षात् प्रसिद्ध्यति महीतले।5।
संस्थाने राष्ट्रिये नित्यं संस्कृताय समर्पिते।
कीर्त्याख्ये रघुनाथे च परिसरे प्रतिष्ठिते।6।
निदेशकपदे यश्च साम्प्रतं सुप्रतिष्ठितः।
नित्यं संवर्धते तस्यानुभवोऽपि प्रशासने।7।
व्याकरणविभागेऽसावाचार्योऽध्यक्षभाजनः।
समकालिक-साहित्ये मतिं धत्ते विशेषतः।8।
मौलिको लेखको हिन्दी-संस्कृताङ्ग्लोत्कलेषु वै।
कविःकथाकारः ख्यातस्सम्पादकस्समीक्षकः।9।
सोऽप्यनुवादकस्स्मृतश्शोध-निर्देशकः पुनः।
शैक्षिक-भूमिकास्वेव बह्वीषु सुनियोजितः।10।
भाषा-साहित्य-क्षेत्रेषु संस्कृताय समर्पितः।
सर्जनानुवादाभ्याञ्च समीक्षा-शोधयोः पुनः।11।
रुचिर्नैकेषु शास्त्रेषु शोधानुवादसाधने।
व्याकरण-साहित्याभ्यां वेद-दर्शनयोस्तथा।12।
सम्मानाश्चार्जिताः नैके साहित्यिकोपलब्धये।
विविध-बाणभट्टाभ्यां संस्कृत-प्रतिभा पुनः।13।
उपेन्द्रभञ्ज-सम्मानः लालो गिरिधरस्स्मृतः।
पण्डितराजसम्मानः भारतीयोऽखिलः क्वचित्।14।
सम्मानो भाउरावश्च भाषापरिषदोऽपरः।
उपाध्यायः महत्पूर्वः सम्मानः संस्कृते महान्।15।

काव्य-शोधात्मकाः ग्रन्थाः शताधिकाः प्रकाशिताः।
केचिदनूदितास्तेषु सम्पादिताश्च मौलिकाः ।16।
छन्दोबद्धानि काव्यानि मुक्तच्छन्दांसि कानिचित्।
कथोपन्यासनाट्येषु लेखनञ्च विशिष्यते ।17।
सङ्गमेनाभिरामाख्या ऋतुपर्णा व्यथा पुनः।
एकविम्बात्मकं काव्यं प्रियतमा प्रसिद्ध्यति ।18।
यात्रा च दारुब्रह्मापि वेलेण्टाइन् क्वचित् पुनः।
काव्येषु मौलिकेष्वेव शतकं प्रतिवेशिनः ।19।
चरितं भवभूतेश्च शङ्करस्य तु चापरम्।
सर्दारवल्लभ-भ्रातुश्चरितं लिखितं तथा ।20।
तेन महात्म-माहात्म्यं महाकाव्यं निवेदितम्।
चरितं नैकसर्गेषु चित्रितं तत्र गान्धिनः ।21।
एवं हि खण्डकाव्यञ्च लोकभाषामृतं पुनः।
कोरोणायणमप्यस्य कोरोणापरकं मतम् ।22।
यात्रावृत्तानि काव्यानि सन्ति नैकानि तस्य वै।
पत्रिकासु च भिन्नासु प्रकाशितानि साम्प्रतम् ।23।
सोमनाथायनं खण्डं काव्यं कुम्भायनं तथा।
प्रयागस्य प्रयाणञ्च नवदुर्गायणं पुनः ।24।
शतकं वदरीशस्य वैष्णोदेव्याश्च नूतनम्।
केदारेशस्य वृत्तञ्च वृत्तं कोटेश्वरस्य वै ।25।
काव्यं चन्द्रवदन्याश्च तन्नाम-महिमामृतम्।
देवभूमिप्रयाणञ्च सर्जनाधीनमेव हि ।26।
जिजीविषा-बुभुक्षाभ्यां कथासु नीरवस्वनः।
जगन्नाथस्य माहात्म्यं कथास्वपि निरूपितम् ।27।
नवीनाश्च कथाः नैकाः पत्रिकासु प्रकाशिताः।
नैकाः बालकथास्तस्य कविताश्चापि काश्चन ।28।
तारा चारुन्धती ख्याता विवेकलहरी पुनः।
काव्ये चानूदिते ह्येते पत्रालयस्तु नाटकम् ।29।
अनूदितः कथाग्रन्थः स्वप्नो जन्मान्ध-पूर्वकः।
उत्कलीये च काव्ये द्वे कथाग्रन्थः क्वचित्पुनः ।30।
ग्रन्था विंशतिसंख्याका भाषाशिक्षणसाधकाः।
भिन्नविषय-सम्बद्धाः शोधग्रन्थाः दशाधिकाः ।31।
समासशक्तिसिद्धान्तः उपदेशस्तथाऽपरः।
अन्ये दार्शनिकाः पक्षाः ग्रन्थान्तरेषु चिन्तिताः ।32।
भर्तृहरि-पतञ्जल्योर्विचाराः ग्रन्थयोर्द्वयोः।
उत्कलीयावदानञ्च व्याकरणे विचारितम् ।33।
सुव्याकरणतत्त्वानामालोचनं कृतं नवम्।
प्रातिशाख्यैश्च सम्बद्धश्शब्दकोशो विनिर्मितः ।34।
हस्तलेखीय-शास्त्रञ्च पद्ये विनिर्मितं नवम्।
कारिकामयमेवञ्च पाश्चात्यदर्शनं पुनः ।35।
योगरत्नावली वाक्यदीपिकाऽनूदिता क्वचित्।
ग्रन्था लिङ्गाधृता नैकेऽनूद्य सम्पादिताः नवाः ।36।
एको लिङ्गप्रकाशोऽस्ति तथान्यो लिङ्गनिर्णयः।
प्रकाशनप्रतीक्षायां ते च ग्रन्थास्तु साम्प्रतम् ।37।
गद्ये पद्ये निबद्धानि पुस्तकानि च कानिचित्।
शोधपत्राणि सन्त्यस्य सार्धशताधिकानि च ।38।
नित्यं सम्पादिता योग्याः पत्रिकाङ्काः शताधिकाः।
समीक्षापत्रिका दृक् च पद्यबन्धा कथासरित् ।39।
विश्ववारा तथा गङ्गानाथ-झा-शोधपत्रिका।
शाब्दी त्रिपथगा ख्याता वार्तावली तथोशती ।40।
सम्मेलनेषु नैकेषु भागग्रहणमुत्तमम्।
व्याख्यानं शोधपत्रञ्च सत्राध्यक्षीय-भाषणम् ।41।
चत्वारिंशाधिकाश्छात्राः शोधे निर्देशिताः पुनः।
कृता जर्मनि-यात्राऽपि भाषाशिक्षाप्रसङ्गतः ।42।
अधिकृत्य कृतीस्तस्य विश्वविद्यालयेषु च।
प्रबन्धाश्शोध-सम्बद्धाः नैकैस्सन्ति समर्पिताः ।43।
समीक्षाः शोधलेखाश्च तत्कृतीनां शताधिकाः।
पत्रिकासु प्रसिद्धासु भवन्ति च प्रकाशिताः ।44।
सन्ति कार्यरताश्चैते परिसर-शुभोदयात्।
सन्ति परिचितास्सर्वैः कार्यवृत्तैश्च शैक्षिकैः ।45।
प्राध्यापकैश्च छात्राणां प्रारम्भान्मार्गदर्शनम्।
वरिष्ठाचार्यरूपेण कृतमेवात्र सर्वथा ।46।
नवदिशा-प्रदानेन परिसराय साम्प्रतम्।
निदेशकस्य दायित्वं मुदा निभालयन्ति च ।47।
स्थित्वा न्यायोचिते मार्गे प्रगतिश्च यथा भवेत्।
तदर्थं यत्नशीलास्ते दृश्यन्तेऽत्र दिवानिशम् ।48।
केवलं बाह्यसौन्दर्यं परिसरे न काङ्क्षते।
अन्तस्सौन्दर्यमप्यत्र ह्यावश्यकं पदे पदे ।49।
एवं तेषां यतो मार्गः स्वागतार्होऽस्ति सर्वथा।
तदर्थमभिनन्द्यास्ते श्रीबिश्वाल-महोदयाः ।50।



साम्प्रतम् तन्मार्गदर्शने परिसरस्य प्राध्यापकाः छात्राः, कर्मचारिणश्चोत्साहपूर्वकं स्वकर्त्तव्ये संलग्नाः सन्तीति सूचयित्वा हर्षमुनभवामः।



(गणतन्त्रदिवसे समवेताः निदेशकाः, प्राध्यापकाः,कर्मचारिणश्च)

## परिसरे समायोजितः 72तमो गणतन्त्रदिवसः

भारतस्य प्राणभूतं वर्तते तस्य संविधानम्, यतोहि कथं प्रजा अनुशासनीयास्ते नियमा भारतस्य स्वतन्त्रतां प्रदातुं ये कृतसङ्कल्पा आसन् तैः जनवरीमासस्य 26 तमे दिनाङ्के 1950 तमे वर्षे भारतस्य संविधाने निबद्धाः। एवं तदा गणतन्त्रस्य स्थापना भारते जाता। तस्मात्कालादधुनापर्यन्तं स दिवसः गणतन्त्रदिवरूपेण अस्माकं देशे सर्वैः जनैः हर्षोल्लासेन परिपाल्यते। अस्मिन् वर्षे भारतस्य 72 तमो गणतन्त्रदिवस आसीत्। स च दिवसः सम्पूर्णराष्ट्रे महतोल्लासेन सर्वासु संस्थासु आयोजितः। केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरेणापि अयं राष्ट्रमहोत्सवः सम्यक्तया परिपालितः। अस्य कार्यक्रमस्य संयोजनं साहित्यविभागस्य प्राध्यापकेन डा.कृपाशङ्करशर्मणा, सञ्चालनञ्च डा.सुरेशशर्मणा विहितम्। परिसरस्य नवनियुक्तनिदेशकेन आचार्यबनमालीबिश्वालमहोदयेन पुस्तकालयाध्यक्षस्य श्रीनवीनडोबरियालस्य स्वागतसंवर्धनेन समं परिसरप्राङ्गणे ध्वजोत्तलनं कृतम्। तदनन्तरं सर्वे राष्ट्रगानं कृतवन्तः तदनु राष्ट्रगीतं च प्रस्तुतवन्तः। अवसरेऽस्मिन् परिसरनिदेशकेन प्रो.बनमालीबिश्वालमहोदयेन स्वतन्त्रभारतस्योपलब्धीनां क्षतीनां च विषये स्वविचाराः प्रस्तुताः तथा स्वस्वस्तरेषु देशसेवायै सर्वेषामन्तेवासिनां आह्वानञ्च कृतम्। कोरानाकारणात्कथमस्माकं देशस्यार्थिकसामाजिकशैक्षिणिकक्षेत्राणां हानिरभवत्, कथञ्च तां क्षतिं वयं पूरयितुं समर्था भवामः इत्यपि तैरुद्बोधितम्। अवसरेऽस्मिन् विद्यमानाः आसन् अस्य परिसरस्य पूर्वनिदेशकाः प्रो.के.बी.सुब्बरायुडुमहोदयाः, यैः कथं विवधसमस्यानां समाधानं कर्त्तव्यम्, छात्राणां भविष्यनिर्माणं च कथं कुशलतया भवेदिति सर्वम् उपदिष्टम्। साहित्यविभागाध्यक्षेण प्रो.विजयपालशास्त्रिणापि अवसऽरेस्मिन् स्वविचाराः प्रस्तुताः। छात्राणामभिवृद्धिः कथं स्यादिति विषयमधिकृत्य तेषामुपदेशः आसीत्। न्यायविभागाध्यक्षेण डा.सच्चिदानन्दस्नेहीमहोदयेन भारतीयसंविधानस्य प्रस्तावना पठिता। डा.आर.बालमुरगमहोदयेन गृहात् नगरे, नगरात् जनपदे, जनपदात् प्रदेशे, प्रदेशात् देशे नियमाः भवन्तीती प्रतिपादितम्। डा.कृपाशङ्करशर्मणा स्वकाव्यमत्र प्रस्तुतम्, डा.शैलेन्द्रप्रसादउनियालमहोदयेनापि काव्यपाठः कृतः। डा.अनिलकुमारेण स्वजीवने अनुशासनस्य समयस्य च प्रभावः आनेतव्य इत्युक्तम्। डा.अवधेशबिजल्वाणः आङ्गलभाषायां स्वविचारान् प्रस्तुतवान्। श्रीपङ्कजकोटियालेन मानवव्यवहारस्य यथार्थताविषये स्ववक्तव्यं प्रदत्तम्। अन्ते मिष्टान्नवितरेणेनायं कार्यक्रमः समाप्तोऽभवत्। अस्य सम्पूर्णकार्यक्रमस्य छायाचित्रग्रहणम्, अन्तर्जालमाध्यमेन कार्यक्रमस्य प्रसारणं च सङ्गणकप्राध्यापकेन श्रीपङ्कजकोटियालमहोदयेन कृतम्। एवम्प्रकारेणायं कार्यक्रमः श्रीरघुनाथकीर्तिपरिसरे महता हर्षोल्लासेन समायोजितः।



(ध्वजमुत्तोलयन्तः परिसरनिदेशकाः)

## समायोजितं परिसरे राष्ट्रियचेतनाविषकं कविसम्मेलनम्

देशस्य स्वतन्त्रतायै यथा देशभक्तानां देशप्रेम तस्मिन् काले आसीत् तथैवाधुनापि विद्यत एव। केचन शस्त्रेण राष्ट्ररक्षणं कुर्वन्ति, केचन च शास्त्रेण। यथोक्तं "शस्त्रेण रक्ष्यते राष्ट्रं शास्त्रचर्चा प्रवर्तते"। काव्यमपि तथाभूतं साधनमस्ति येन सर्वेषां जनानां मनसि राष्ट्रभक्तिभावना समुत्पद्यते। एवं विचार्य गणतन्त्रदिवसस्य पूर्वसन्ध्यायां 25 तमे दिनाङ्के श्रीरघुनाथकीर्तिपरिसरेण राष्ट्रचेतना इति विषयमधिकृत्य राष्ट्रियकविसम्मेलनम् एकमायोजितम्। यत्र देशस्य सर्वेभ्यः प्रदेशेभ्यः कविकाव्यकौतुकरचनाप्रपञ्चचतुराः समवेताः समभवन्। निदेशकस्य प्रो.बनमालीबिश्वालमहोदस्य अध्यक्षीयनिर्देशने, संयोजकस्य डा.सच्चिदानन्दस्नेहीमहोदयस्य संयोजने, डा.शैलेन्द्रप्रसादउनियाल-डा.अनिलकुमारयोः सञ्चालने चायं कार्यक्रमः सञ्जातः। अत्र येषां कवीनां काव्यपाठेन सर्वे सहृदयाः काव्यरसनिमग्ना अभवन् तेषां नामानि काव्यपाठक्रमेणैवमासन्- प्रो.भागीरथिनन्द(नवदेहली)-श्रुतिसंस्कृति(प्रयागराजः)-डा.सोमनाथदाश (तिरुपतिः)-डा.केशवदेव(चण्डीगढम्)-डा.कृपाशङ्करशर्म(देवप्रयागः)-डा.अरुणनिषाद(सुल्तानपुरम्)-डा.भारतभूषणरथ(तिरुपतिः)-डा.आशुतोषगुप्त(श्रीनगरम्)-डा.वीरेन्द्रसिंहबर्त्वाल (देवप्रयागः)- डा.ब्रजेन्द्रकुमारसिंहदेव(हरिद्वारम्) –डा.परागजोशी(नागपुरम्)-डा.अवधेशबिजल्वाण (देवप्रयागः)-डा.निरञ्जनमिश्र(हरिद्वारम्)- डा.प्रियव्रतमिश्र(दरभङ्गा)-डा.बुद्धेश्वरषडङ्गि(कालकता)-डा.धर्मेन्द्रकुमारसिंहदेव(भोपालम्)-सन्दीपकोठारी(देवप्रयागः)-डा.अनिलकुमार(देवप्रयागः)-डा.शैलेन्द्र- प्रसादउनियाल(देवप्रयागः)-प्रो.बनमालीबिश्वालमहोदयाः(देवप्रयागः) च। अत्र श्रीलालबहादुरशास्त्री- राष्टिय-संस्कृत-विश्वविद्यालयात् समागतेन प्रो.भागीरथिनन्देन भारतस्य स्वतन्त्रताया विषये व्यंग्यरूपेण स्वकाव्यं प्रस्तुतम्। अध्यक्ष-प्रमुखैः अन्यैः कविभिश्च विभिन्नां शैलीमाश्रित्य राष्ट्रचेतना-सम्बद्धः काव्यपाठः कृतः। तद्यथा-



(सङ्गोष्ठ्याम् अन्तर्जालमाध्यमेन समुपस्थिताः कवयः)

कु.श्रुतिसंस्कृतिद्वारा भारतस्योपलब्धीनां क्षतीनां च विषये स्वकाव्यमाध्यमेन विचाराः प्रस्तुताः। राष्ट्रस्य चेतनाया विषये च केशवदेवेन, सङ्गच्छध्वमिति विषये डा.कृपाशङ्करशर्मणा, महात्मागान्धिनः विषये भारतभूषणरथेन, भारतस्य महिममण्डनविषये अरुणनिषादेन स्वकाव्यान्यत्र प्रस्तुतानि। भारतस्योदारनीतेर्विषये आशुतोषगुप्तेन, भारतस्य जनानां विषये वीरेन्द्रबर्त्वालेन, भारतस्य विभिन्नसंस्कृतीनां विषये ब्रजेन्द्रकुमारसिंहदेवेन, भारतस्य सम्प्रभुताविषये परागजोशीमहोदयेन स्व-स्वकाव्यानि प्रस्तुतानि। धर्मेन्द्रकुमारसिंहदेवेन हाइकूकाव्यस्य रमणीयता वर्णिताऽऽसीत् तथैव बुद्धेश्वरषडङ्गिना भारतस्य साम्प्रतिकदशा मनोहरा वर्णिता। सन्दीपकोठारिणः यथा व्यंग्योक्तिप्रधानकाव्यमासीत्तथैव अनिलकुमारस्य स्वभावोक्तिप्रधानकाव्यम् । डा.शैलेन्द्रप्रसादउनियालस्य समर्चना यथा सुमधुरा तथैव प्रो.बनमालीबिश्वालस्य निदर्शनाऽपि विशिष्टा समवलोकिता। एवं श्रीरघुनाथकीर्तिपरिसरे गणतन्त्रदिवसस्य पूर्वसन्ध्यायां सर्वैः कविभिः समुपस्थितैः स्वकाव्यपाठेन भगवती भारती समाराधिता।

## स्वच्छतादिवसः परिपालितः

स्वच्छता मानवानां स्वस्थजीवनस्य कृते प्रप्रथमं कार्यं विद्यते। तया स्वच्छतया मानवस्य मस्तिष्कमपि स्वस्थं भवति। शिक्षितसमाजस्येदं प्रथमं लक्षणं यत्स्वपार्श्ववर्तिषु क्षेत्रेषु स्वच्छताया विषये ध्यानं दद्यात्। अतो भारतसर्वकारेण स्वच्छतादिवसस्य परिपालनं सर्वैः कर्त्तव्यमिति निश्चयं कृत्वा फरवरीमासस्य तृतीये दिनाङ्के स्वच्छतादिवसः निर्धारितः। अस्मिन् दिने सर्वासु संस्थासु स्वच्छतादिवसस्यायोजनं क्रियते। श्रीरघुनाथकीर्तिपरिसरेऽपि स्वच्छतादिवसस्यायोजनमभवत्, तदर्थं परिसरनिदेशकः प्रो.बनमालीबिश्वालः, सर्वे प्राध्यापकाः, कर्मचारिणः, छात्राश्च परिसरप्राङ्गणे समवेता अभवन्। तदनन्तरं परिसरस्य सर्वे जनाः पार्श्ववर्तिषु क्षेत्रेषु गत्वा तत्र इतस्ततः पतितानां कर्गद-पत्र-अपशिष्टपदार्थानां सङ्कलनं कृत्वा तत् सर्वं भस्मसात् कृतवन्तः। एवमेव मार्जनादिमाध्यमेन तत्र स्वच्छताकार्यक्रमः सम्पादितः। अवसरेऽस्मिन् निदेशकमहोदयेन सर्वे प्राध्यापकाः, कर्मचारिणः, छात्राश्च सम्बोधिताः यत्स्वच्छवातावरणे साक्षाद् ईश्वरो वसति, अतः अस्माभिः सर्वदा स्वस्य, स्वनिवासस्थानस्य, पार्श्ववर्तिनः स्थानस्य च स्वच्छताविषये निरन्तरं चिन्तनीयम्। वयं स्वच्छतापूर्वकं निवसामश्चेत् कोऽपि रोगो नैव भवितुं शक्नोति। केचन प्राध्यापका अपि स्वविचारान् प्रस्तुतवन्तः, केचन च स्वच्छताविषयकानि स्वकाव्यानि पठितवन्तः। निदेशकमहोदयेन प्रो.बनमालीबिश्वालमहोदयेनापि स्वकाव्यमाध्यमेन कथं मानवजीवने स्वच्छताया महत्त्वं भवतीति मधुरतया प्रस्तुतम्। अवसरेऽस्मिन् डा.सच्चिदानन्दस्नेही-डा.कृपाशङ्करशर्म- डा.शैलेन्द्रप्रसादउनियाल- डा.अनिलकुमार- डा.अरविन्दगौड- डा.श्रीओमशर्म- डा.सुरेशशर्म-डा.दिनेशचन्द्रपाण्डेय- डा.अवधेशबिजल्वाण- श्रीपङ्कजकोटियालमहोदयाः समुपस्थिता आसन्। एवं श्रीरघुनाथकीर्तिपरिसरे स्वच्छतादिवसस्यायोजनं समभवत्।


(स्वच्छतादिवसे परिसरसदस्याः)

## परिसरभवननिरीक्षणसमितेः आगमनम्

केन्द्रीयसंस्कृतविश्वविद्यालयस्य सर्वेषु परिसरेष्वन्यतमः परिसरो विद्यते श्रीरघुनाथकीर्तिपरिसरः, यः देवभूमौ उत्तराखण्डे देवप्रयागस्य गङ्गातटे विराजते। अस्य स्थापना 2016 तमे वर्षे अभवत्। भौगोलिकस्थितिकारणाद् अस्य परिसरस्य निर्माणकार्ये अनेकाः समस्याः सञ्जाताः। केन्द्रीयसंस्कृतविश्वविद्यालयस्य महता सङ्कल्पेन आधिक्येन कार्यं समाप्तम्। कुत्रचिद् याः समस्याः भवननिर्माणकार्यपूर्णतायाम् आसन् तद्विषये ज्ञातुं मुख्यालयपक्षतः एका निरीक्षणसमितिः 06.02.2021 तमे दिनाङ्के परिसरे समागता। दिनद्वयं स्थित्वा तैः निर्माणकार्यं निरीक्षितम्। यस्यां प्रो.पी.एस.एन.राव आनलाइनमाध्यमेन (चेयरमैन अर्बनआर्टकमीशन एण्ड मैम्बर बिल्डिंग कमिटी सी.एस.यू. नवदेहली), प्रो.एस.सुब्रह्मण्यम् शर्मा आनलाइनमाध्यमेन (कुलसचिवः,सी.एस.यू.नवदेहली), आर.के.उपाध्यायः (मैम्बरएक्सपर्ट, बिल्डिंगकमिटि, सी.एस.यू. नवदेहली), प्रो.बनमालीबिश्वालः (निदेशकः,सी.एस.यू.श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः), श्रीवी.श्रीपतिः (परामर्शकः, के.वि.वि.नवदेहली), सुनीलपाराशरः (कन्सलटेन्टइन्जीनियर, सी.एस.यू. नवदेहली), प्रो.आर.जी.मुरलीकृष्णन् (डिप्टीडायरेक्टर,सी.एस.यू.नवदेहली) चैते सदस्याः आसन्। षष्ठे दिनाङ्के एतैः सर्वैः सम्पूर्णभवनस्य निरीक्षणं कृतम्। सप्तमे दिनाङ्के एतेषां परिसरे एव अन्तर्जालीयमुपवेशनमभवत्। यस्मिन् उपवेशने भवननिर्माणसम्बद्धेषु विविधेषु पक्षेषु चर्चा सञ्जाता। मध्याह्ने द्विवादने ये देहलीतः समागता आसन्तेषां प्रस्थानमभूत्। सप्ताहानन्तरं 12 तमे दिनाङ्के निदेशकमहोदयानामपि पुनः मुख्यालये निरीक्षण-समित्या सह उपवेशनमभवत्, यस्मिन् वित्तीयसमस्यानां निवारणमपि जातम्। सम्प्रति निर्माणकार्यं प्रगतिपथे वर्तते, यच्च शीघ्रमेव सम्पूर्णतां यास्यति।


(भवनं निरीक्षमाणाः निरीक्षणसमितेः सदस्याः)

## ज्योतिषविभागीया अन्तर्जालीया राष्ट्रिया सङ्गोष्ठी




(ज्योतिषविभागस्य सङ्गोष्ठ्याः मुखपृष्ठः)

फरवरीमासस्य त्रयोदशदिनाङ्के श्रीरघुनाथकीर्तिपरिसरस्य ज्योतिषविभागेनान्तर्जालीया राष्ट्रिया सङ्गोष्ठी समायोजिता। अस्याः सङ्गोष्ठ्या विषयः आसीत्- "ज्योतिषशास्त्रदृष्ट्या सङ्क्रमणरोगविचारः" इति। अस्यां मुख्यातिथिरूपेण काशीहिन्दूविश्वविद्यालयस्य धर्मविज्ञानसङ्कायस्य ज्योतिषविभागाध्यक्षः प्रो.विनायककुमारपाण्डेयमहोदयाः, मुख्यवक्तृरूपेण श्रीलालबहादुरशास्त्रि- राष्ट्रियसंस्कृतविश्वविद्यालयस्य ज्योतिषविभागस्य पूर्वाध्यक्षाः प्रो. बिहारीलालशर्ममहोदयाः, अध्यक्षरूपेण परिसरनिदेशकाः प्रो.बनमालीबिश्वालमहोदयाश्च सङ्गोष्ठ्यामुद्बोधितवन्तः। कार्यक्रमस्यादौ वैदिकमङ्गलाचरणं वेदविभागाध्यक्षेण डा.शैलेन्द्रप्रसादउनियालमहोदयेन विहितम्। स्वागतभाषणम्, विषयप्रवर्तनं च डा.सुरेशशर्मणा कृतम्। सङ्गोष्ठ्याः सञ्चालनं डा.शैलेन्द्रप्रसादउनियालः कृतवान्। प्रो.विनयकुमारपाण्डेयमहोदयेन ज्योतिषशास्त्रे सङ्क्रमणरोगाणां विषये कथं चर्चा विद्यते, कथञ्च तेषां रोगाणां निवारणोपाया अपि तत्र निगदितास्सन्ति इत्यस्मिन् विषये विस्तरेण प्रोक्तम्। प्रो.बिहारीलालशर्ममहोदयेन ज्योतिषशास्त्रस्य वर्तमानसन्दर्भे कीदृशी उपयोगिता विद्यते चेत्यस्मिन् विषये स्वविचाराः समुपस्थापिताः। प्रो.बनमालीविश्वालमहोदयेन ज्योतिषशास्त्रे कथं सङ्क्रमणरोगा वर्णितास्सन्ति तेषामेका विस्तृतपरम्परा प्रस्तुता। तत्र समेषां रोगाणां शमनं ज्योतिषाधारेण कथं भवितुं शक्नोतीत्यपि प्रतिपादितम्। सङ्गोष्ठ्याः संयोजनं ज्योतिषविभागस्य प्राध्यापकः डॉ.सुरेशशर्मा, धन्यवादज्ञापनं च डा.श्रीओमशर्मा कृतवन्तौ। अस्यां सङ्गोष्ठ्यां सङ्क्रमणरोगमधिकृत्य सप्तदशशोधपत्राणि प्रस्तुतानि। एवं ज्योतिषशास्त्रस्येयं सङ्गोष्ठी सम्पूर्णतामगात्।

## हर्षोल्लासेन सञ्जातं वसन्तपञ्चमीपर्वणः आयोजनम्



(सरस्वतीं पूजयन्तः परिसरसदस्याः)

सर्वेषु मासेषु वसन्तमासोऽन्यतमः भवति, यस्मिन् सर्वे पशुपक्षिमृगादयः अत्यन्तं सुखमनुभवन्ति। अस्यैव मासस्य पञ्चम्यां तिथौ मातरं सरस्वतीं सर्वे विद्यानुरागिणः पूजयन्ति। यतोहि सा विद्यते विद्या-प्रदात्री देवी। अतः शिक्षणसंस्थासु विशेषतः अस्य पर्वणः विशिष्टं महत्त्वं वर्तते। केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरेऽपि अयं महोत्सवः 16-02-2021 तमे दिनाङ्के महतोत्साहेन हर्षोल्लासेन च समायोजितः। प्रातःकाले एव निदेशकमहोदयस्य निर्देशानुसारं परिसरस्य नूतनभवने सरस्वतीपूजनार्थं वैदिकच्छात्रैः वेदविभागाध्यक्षेण च सर्वा व्यवस्था कृता। अपि च निदेशकमहोदयस्य प्रो.बनमालीबिश्वालमहोदयस्य, साहित्यविभागाध्यक्षस्य प्रो.विजयपालशास्त्रिणश्च सान्निध्ये सरस्वत्याः पूजनकार्यक्रमः संयोजितः। डॉ.कृपाशङ्करशर्मणः सौजन्याह अवसरेऽस्मिन् मध्याह्न भोजन-प्रसादस्य व्यवस्था कृता आसीत्। पूजनावसानसमये बहुभिश्छात्रैः स्वकाव्यपाठः, स्तोत्रपाठश्च कृतः, प्राध्यापकैरपि स्वविचाराः प्रस्तुताः। निदेशकमहोदयेन अस्मिन्नवसरे वाग्देवी-समर्चनम् इति शीर्षकान्वितम् स्वरचितं स्तोत्रकाव्यं प्रस्तुतम्। तदनन्तरं सर्वे प्रसादग्रहणं कृत्वा अत्यन्तप्रसन्नचित्ताः समभवन्। एवं प्रकारेण वसन्तपञ्चमीपर्वणः कार्यक्रमः श्रीरघुनाथकीर्तिपरिसरे भक्तिपूर्वकं परिपालितः।

## वेदविभागेन समायोजिता अन्ताराष्ट्रिया सङ्गोष्ठी




(वेदविभागस्य सङ्गोष्ठ्याः मुखपृष्ठः)

वेदविभागेन 20.02.2021 दिनाङ्के 'वैश्विकसंस्कृतौ वैदिकवाङ्मयस्य प्रभावः' इति विषयमधिकृत्य अन्ताराष्ट्रियायाः सङ्गोष्ठ्याः आयोजनं कृतम्। तत्र मुख्यवक्तृत्वेन प्रो.रवीन्द्रअम्बादासमूले (निदेशकः सी.ए.एस.एस.विश्वविद्यालयः पुणे), मुख्यातिथित्वेन प्रो.के.सूर्यनारायणः(शोध-प्रकाशनविभागाध्यक्षः, राष्ट्रियसंस्कृतविद्यालयः,तिरुपतिः), सारस्वतातिथित्वेन प्रो.सदानन्ददासः (लाइप्त्सिक्-विश्वविद्यालयः, जर्मनीदेशः), अध्यक्षत्वेन परिसरनिदेशकः प्रो.बनमालीबिश्वालः, संयोजकत्वेन डा.शैलेन्द्रप्रसादउनियालश्च (वेदविभागाध्यक्षः) समुपस्थिताः सन्तः विचारान् प्रकटीकृतवन्तः। अस्याः सङ्गोष्ठ्याः सञ्चालकः व्याकरणविभागस्य प्राध्यापकः डा.श्रीओमशर्मा आसीत्। प्रो.रवीन्द्रअम्बादासमूलेमहोदयेन वैदिकसंस्कृतौ कथं मानवसभ्यतायाः तत्त्वानि निरूपितानि सन्ति, कथं समाजस्य वर्णव्यवस्था तत्र वर्णिता चेत्यस्मिन् विषये विस्तरेणोक्तम्। प्रो.के.सूर्यनारायणेन वर्तमानपरिप्रेक्ष्ये वैदिकतत्त्वानाम् आवश्यकता कथं विद्यते, पाश्चात्यसंस्कृतेरनुकरणेन कथं वयं स्वमार्गाद् भ्रष्टा सञ्जाता इत्यस्मिन् विषये निगदितम्।

प्रो.सदानन्ददासः भारतस्य प्राचीनसंस्कृतेः विदेशेष्वपि कथं प्रभावो विद्यते, कथं च वैदेशिका अपि अस्माकं संस्कृतिं स्वीकुर्वन्तः इत्यस्मिन् विषये स्वविचारान् प्रस्तुतवान्। तदनन्तरं शोधपत्रवाचनमभवत्। तत्र च आहत्य 25तोऽपि अधिकाः पत्रवाचकाः स्वगम्भीरचिन्तनं शोधपत्रमाध्यमेन प्रस्तुतवन्तः। निदेशकमहोदयेन प्रो.बनमालीबिश्वालमहोदयेन पुरुषसूक्ते कथं भारतीयसमाजस्य वैशिष्ट्यं प्रतिभाति, कथं तस्य सिद्धान्तस्य वर्तमानसमाजे आवश्यकता अनुभूयते चेत्येतत्सर्वं प्रतिपादितम्। अन्ते दिनेशपाण्डेयमहोदयस्य धन्यवादज्ञापनेन, शान्तिपाठेन च कार्यक्रमस्य समाप्तिरभवत्। तत्र डा.शैलेन्द्रउनियालमहोदयेन प्रस्तुतं पद्यमयं प्रास्ताविकम्-

वैश्विक्यां कः प्रभावोऽभवदिह युगके वेदवेदाङ्गकानां
विद्वांसः सत्प्रयासान्कुरुत लिखत भो येन लोके सुखं स्यात्।
अन्तर्जालीयगोष्ठ्यां भवतु दृढतया संस्कृतेः सद्विचारः
छात्राः पात्राणि सन्तूत्तमनिखिलतया भावना मेऽस्ति सैषा।।
विद्वांसोऽतश्च सम्प्रार्थ्या गोष्ठ्यां वेदविदां सदा।
लोके स्यात्तेन नैरुज्यं विश्वासः सुदृढो मम।।

प्रतिवर्षं केन्द्रीयसंस्कृतविश्वविद्यालय श्रीरघुनाथकीर्तिपरिसरेण शैक्षिकसङ्गोष्ठ्यः समायोज्यन्ते। वैश्विकविपत्सङ्क्रमणकालोऽयम्, अतस्ताः साम्प्रतं युगानुगुणम् अन्तर्जालीया सङ्गोष्ठीरूपेण समायोज्यन्ते। वेदसङ्गोष्ठ्या मुख्यविषयः- "वैश्विकसंस्कृतिषु वैदिकवाङ्मयस्य प्रभावः तत्र च अधोलिखिता" उपविषयाः आसन्-

1.श्रौतयागानां वैशिष्ट्यम्, 2. स्वरप्रक्रियायामर्थपरिवर्तनदिशा, 3.ब्राह्मणग्रन्थानां निर्वचनविधिः,
4.कल्पानां लोकोपकारित्वम्, 5. छन्दसां महत्त्वम्, 6.वैदिकसाहित्यस्य साहित्यान्तरे प्रभावः ।



(मातृभाषादिवसे अन्तर्जालेन समुपस्थिताः सम्मानितजनाः )

## परिपालितः मातृभाषादिवसः

यथा जननी जन्मभूमिश्च स्वर्गादपि गरीयसी इत्युच्यते तथैव मातृभाषाऽपि भवत्येव। अतः सम्पूर्णभारते मातृभाषाया अभिवृद्धये विभिन्नाः कार्यक्रमाः सर्वासु संस्थासु आयोज्यन्ते। केन्द्रीयविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरेऽपि मातृभाषादिवसस्यायोजनं फरवरीमासस्य एकविंशे दिनाङ्के अभवत्। अवसरेऽस्मिन् परिसरेणैका सङ्गोष्ठी समायोजिता। अस्य कार्यक्रमस्यारम्भो डा.शैलेन्द्रप्रसादउनियालस्य वैदिकमङ्गलाचरणेन किञ्च डा.दिनेशचन्द्रपाण्डेयस्य लौकिकमङ्गलाचरणेन सञ्जातः। तत्र समागतानामतिथीनां स्वागतं इतिहासविषयस्य प्राध्यापकेन डा.अरविन्दगौरमहोदयेन कृतम्, विषयोपस्थापनञ्च आङ्गलभाषायाः डा.अवधेशबिजल्वाणद्वारा अभवत्। कार्यक्रमस्य सञ्चालनं हिन्दीभाषायाः प्राध्यापकः डा.वीरेन्द्रसिंहबर्त्वालः कृतवान्। कार्यक्रमस्यस्याध्यक्षः परिसरनिदेशकः व्याकरणविभागाध्यक्षश्च प्रो.बनमालीबिश्वालमहोदय आसीत्। कार्यक्रमेऽस्मिन् उत्तराखण्डस्य सुप्रसिद्धलोकभाषाविद्, लोकगायकश्च डा.प्रीतमभरतवाणमहोदयः मुख्यवक्तृरूपेणासीत्, येन मातृभाषाया महत्त्वविषये स्वविचाराः उपस्थापिताः - मातृभाषैवैतादृशी भाषा विद्यते यया अन्तःकरणे विद्यमानानां विचाराणां सम्यक्तया प्रकाशनं भवति। विशिष्टवक्तृरूपेणात्र विद्यमानेन गढवालीलोकभाषया सुविख्यातेन कविना मुरलीदिवानमहोदयेन सर्वप्रथमं मातृभाषाया विषये स्वविचाराः प्रस्तुताः। तदनन्तरं तेन देशप्रेम्णा परिप्लुतं स्वकाव्यं श्रावितं यत् श्रुत्वा सर्वे आनन्दनिमग्ना अभवन्। कार्यक्रमस्य सारस्वतातिथिरूपेण गढवालीभाषाया अनुवादकरूपेण लब्धयशा श्रीदीपकविजल्वाण आसीत्। तेन लोककाव्यस्य या दीनावस्था सञ्जाता, तस्या दशाया विषये गम्भीरचिन्तनं कृतम्। आध्यक्षीयोद्बोधने निदेशकमहोदयेन आदौ ओडियाभाषायां काव्यं पठितं, तदनन्तरञ्च भाषाणां परस्परं प्रभावस्य विषये, तस्य वैशिष्ट्यविषये च स्वविचाराः समुपस्थापिताः। सङ्गणकप्राध्यापकेन समागतानां सर्वेषां धन्यवादज्ञापनं विहितम्। एवं प्रकारेण मातृभाषादिवसस्य कार्यक्रमः सम्पूर्णतां गतः।

## समायोजिता साहित्यविभागीया राष्ट्रिया सङ्गोष्ठी



(साहित्यविभागस्य सङ्गोष्ठ्या: मुखपृष्ठ:)

फरवरीमासस्य एकविंशतमे दिनाङ्के प्रातःकाले श्रीरघुनाथकीर्ति-परिसरे मातृभाषादिवसस्योजनमभवत्। तदनन्तर सायं 3-00 वादने साहित्यविभागे 'संस्कृतसाहित्ये शब्दशक्तिविमर्शः' इति विषयमाधारीकृत्य राष्ट्रिया सङ्गोष्ठी समायोजिता। अस्यां सङ्गोष्ठ्यां मुख्यातिथित्वेन सोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतयः विविधशास्त्रनिष्णाताः प्रो.गोपबन्धुमिश्रमहोदया:, मुख्यवक्तृत्वेन काशीहिन्दूविश्वविद्यालयस्य हिन्दूधर्मसंस्कृतिसङ्कायान्तर्गताः साहित्यविभागाध्यक्षाः प्रो. उमाकान्तचतुर्वेदिनः, कार्यक्रमस्याध्यक्षत्वेन परिसरनिदेशकाः प्रो.बनमालीविश्वालमहोदयाः, संयोजकत्वेन साहित्यविभागाध्यक्षाः प्रो.विजयपालशास्त्रिणः, सह-संयोजकत्वेन डा.कृपाशङ्करशर्ममहोदयाः, सञ्चालकत्वेन डा.अनिलकुमारमहोदयाश्च स्व-स्व दायित्वं निर्व्यूढवन्तः। कार्यक्रमस्यादौ वैदिकमङ्गलाचरणं वेदविभागाध्यक्षः डा.शैलेन्द्रप्रसादउनियालमहोदयः, लौकिकमङ्गलाचरणञ्च साहित्यस्य प्राध्यापकः डा.दिनेशचन्द्रपाण्डेयमहोदयः कृतवन्तौ। तदनन्तरं मुख्यातिथीनामभिभाषणमभवत् यैः शब्दशक्तिविषये महान्तो विचाराः प्रस्तुताः, व्याकरणे कथं शब्दशक्तीनां प्रतिपादनमभवत्, न्याये तस्याश्चर्चा कथं विद्यते, मीमासंकानामत्र किं मतम्, साहित्यशास्त्रे कथं समेषामेषां समायोजनम् आचार्यैः कृतम् एतत्सर्वमतीवसरलरीत्या प्रो.गोपबन्धुमिश्रैः सप्रमाणं प्रतिपादितम्। मुख्यवक्तृत्वेनात्र समुपस्थिता आसन् काशीहिन्दूविश्वविद्यालयबाराणसीतो धर्मविज्ञानसङ्कायप्रमुखाः प्रो.उमाकान्तचतुर्वेदिनः, यैः शब्दशक्तिविषये या परम्परा संस्कृतसाहित्यशास्त्रे समागता तस्या विशदतया विवेचनमत्यन्तगम्भीररूपेण कृतम्। ततश्च 40 शोधार्थिनः विभिन्नेभ्यः प्रदेशेभ्यः प्रत्रवाचनाय संयुक्ता आसन्, यैश्च गम्भीरचिन्तमत्र स्वकीयशोधपत्रमाध्यमेन प्रस्तुतम्। तदनन्तरं सङ्गोष्ठ्या अध्यक्षरूपेण विद्यमानेन परिसरनिदेशकेन प्रो.बनमालीविश्वालमहोदयेन काव्यतत्वसमन्विव्याख्यातः स्वकाव्यशास्त्रीयग्रन्थतः शब्दशक्तिप्रसङ्गे लक्षणान्युदाहरणानि च विस्तरेण प्रस्तुतानि। तदनन्तरं डा.कृपाशङ्करशर्मणा समुपस्थितेभ्यः धन्यवादः ज्ञापितः। कार्यक्रमस्यान्ते डा.शैलेन्द्रप्रसादउनियालमहोदयेन शान्तिपाठः कृतः। एवं कार्यक्रमोऽयं सम्पूर्तिं गतः। तत्र च साहित्यविभागाध्यक्षमहोदयेन प्रो.विजयपालशास्त्रिणा प्रस्तुतं प्रास्ताविकमित्थं वर्तते-

शब्दार्थौ काव्यमिति साहित्यविदां नयः। तत्र शब्दस्त्रिविधः शक्तियुक्त एव त्रिविधमर्थं प्रकटयति। वागर्थाविव सम्पृक्ताविति कालिदासीयोपमापि शब्दार्थयोर्नित्यं सम्बन्धं प्रस्तौति ।

नित्याः शब्दार्थसम्बन्धाः समाम्नाता महर्षिभिः ।
सूत्राणामनुतन्त्राणां भाष्याणां च प्रणेतृभिः ॥

इति भर्तृहरेरुक्तिरपि 'नित्यः शब्दार्थसम्बन्धः' इति पाणिनीयं नयं विशदीकरोति । 'सिद्धे शब्दार्थसम्बन्धे' इति कात्यायनवचनमपि स्फुटतया प्रकटयति यत् पाणिनीयं तन्त्रं शब्दार्थयोः नित्यं सम्बन्धं पुरस्कृत्य एव प्रवर्त्तते । अर्थं प्रत्याययिष्यामिति शब्दः प्रयुज्यते , प्रत्यर्थं शब्दनिवेश इत्याद्या अभियुक्तोक्तयः शब्दार्थसम्बन्धं समामनन्ति । शब्दश्चार्थप्रतिपादने शक्तः इति तत्र शक्तिः सहजसिद्धेति शास्त्रविदां सिद्धान्तः। सा च शक्तिस्त्रिधा स्वीक्रियतेऽभिधा लक्षणा व्यञ्जना चेति साहित्यशास्त्रप्रणेतृणां राद्धान्तः। भरतमुनेः नाट्यशास्त्रं समारभ्याद्यावधि प्रवृत्तायां काव्यशास्त्रीयचिन्तनपरम्परायां शब्दशक्तिविमर्शः विस्तरेण विहितो दृश्यते । ध्वनिप्रस्थापनपरमाचार्येण ध्वन्यालोककृता श्रीमताऽऽनन्दवर्धनेन तदनुयायिना वाग्देवतावतारेण मम्मटाचार्येण परिवर्तिभिश्च कविराजविश्वनाथ-पण्डितराजजगन्नाथप्रभृतिभिश्चापि शब्दशक्तिविमर्शो वैशद्येन व्यधायि स्वीयग्रन्थेषु । मुकुलभट्टस्याभिधामातृकागतं मीमांसानुसारि शब्दशक्तिविषयकं प्रतिपादनमपि मम्मटाचार्येण समीक्षितं परिष्कृतं च कृत्वा प्रस्तूयते काव्यप्रकाशस्य द्वितीयोल्लासे शब्दव्यापारविचारनामके प्रकरणे च । इत्थं शब्दशक्तिविषयको विमर्शः साहित्यशास्त्रे परां कोटिमाटीकमानो दृश्यते। एतमेव विषयमवलम्ब्यैषमः केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरीय-साहित्यविभागस्य शास्त्रीया राष्ट्रियसङ्गोष्ठी सङ्कल्पिता वर्तते । तत्र चेमे उपविषयाः निर्धारिताः-

१.अभिधाशक्तिविमर्शः, २. लक्षणा तेन षड्विधा, ३. सा शक्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च,
४. व्यञ्जना-स्थापना, ५. संकेतितश्चतुर्भेदो जात्यादिर्जातिरेव वा , ६. शाब्दी व्यञ्जना,
७ आर्थी व्यञ्जना, ८. नानुमानं रसादीनां व्यंग्यानां बोधने क्षमम्, ९. भक्त्या बिभर्ति नैकत्वं रूपभेदादयं ध्वनिः,
१० रसस्य व्यङ्ग्यता, ११. अभिधेयेन सम्बन्धातलक्षणा पञ्चधा मता, १२. विश्वनाथ- प्रदर्शितानां लक्षणाभेदानां समीक्षा
१३. साहित्येतरग्रन्थेषु शब्दशक्तिविमर्शश्च।



## आधुनिकविभागीया राष्ट्रिया सङ्गोष्ठी




केन्द्रीयविश्वविद्यालये संस्कृतेन सह अन्येषामपि विषयाणामध्ययनम् अध्यापनञ्च भवति। हिन्दी-आङ्गल-इतिहास सङ्गणक प्रभृतिनां विषयाणाम् अध्यापनमप्यत्र प्रचलति। आधुनिकविभागे एतेषां विषयाणां समावेशो वर्तते। 27.02.2021 तमे दिनाङ्के श्रीरघुनाथकीर्तिपरिसरस्य आधुनिकविभागेन 'साहित्य और इतिहास में राष्ट्रवाद' इत्यस्मिन् विषये राष्ट्रिया सङ्गोष्ठी समायोजिता। तस्याञ्च सर्वादौ वैदिकमङ्गलाचरणं डा.शैलेन्द्रप्रसादउनियालमहोदयेन, लौकिकमङ्गलाचरणं डा.अनिलकुमारमहोदयेन च विहितम्। तदनन्तरं स्वागतभाषणं हिन्दीविषयस्य प्राध्यापकेन डा.वीरेन्द्रबर्त्वालमहोदयेन कृतम्, संयोजकेन डा.अरविन्दगौरमहोदयेन च विषयप्रवर्तनं कृतम्। तत्र मुख्यातिथिरूपेण प्रो.डी.आर.पुरोहितः(नेशनल फैलोः इण्डियन इंस्टीट्यूट आफ एडवांस स्टडी, शिमला तथा भूतपूर्वः आङ्गलविभागाध्यक्षः हेमवतीनन्दनबहुगुणागढवालविश्वविद्यालयः, श्रीनगरम्, उत्तराखण्डः) समुपस्थित आसीत्, येन राष्ट्रस्य किं स्वरूपम्, कथं तस्य विस्तृतस्वरूपम् इतिहासग्रन्थेषु समागतम्, साहित्यस्य किं स्वरूपं कथं तदधुना परिवर्तितम् इत्यस्मिन् विषये विस्तरेण चर्चा कृता। मुख्यवक्तृरूपेण समागतेन प्रो.शिशिरकुमारपाण्डेयेन (भूतपूर्वसङ्कायाध्यक्षः, आधुनिकविभागाध्यक्षश्च केन्द्रीयसंस्कृतविश्वविद्यालयः, लखनऊपरिसरः) उक्तं यद् भारतस्य राष्ट्रवादः विविधतां जनयति, समाजाय च सुखं प्रयच्छति। तदनन्तरं शोधपत्रवाचकैरपि अत्यन्तं सारगर्भितं विवेचनं स्वकीयशोधपत्रमाध्यमेन कृतम्। अस्याः सङ्गोष्ठ्या अध्यक्षरूपेण विराजमानेन प्रो.बनमालीबिश्वालमहोदयेन राष्ट्रवादस्य परिपोषणार्थम् आधुनिकसाहित्यस्य महत्त्वपूर्णं योगदानं कथं वर्तते, कथं राष्ट्रवादेन सामूहिकी भावना समेषां सामाजिकानां मनसि समुदेति, कथं च लोकतन्त्रस्य भावनाऽपि अनेन राष्ट्रवादेन परिपुष्टा भवतीति विस्तरेणोक्तम्। अन्ते सङ्गणकप्राध्यापकेन श्रीपङ्कजकोटियालमहोदयेन धन्यवादज्ञापनं विहितम्। अस्याः सङ्गोष्ठ्याः सञ्चालनम् आङ्गलभाषायाः प्राध्यापकः डा.अवधेशबिजल्वाणमहोदयः कृतवान्। एवम् आधुनिकविभागस्य राष्ट्रिया सङ्गोष्ठी साफल्येना सम्पन्ना अभवत्।

(आधुनिकविभागस्य सङ्गोष्ठ्यां सम्मानितसदस्याः)

## सम्पन्ना न्यायविभागीया राष्ट्रिया सङ्गोष्ठी




(न्यायविभागस्य सङ्गोष्ठ्याः मुखपृष्ठः)

केन्द्रीयसंस्कृतविश्वविद्यालयस्य देवप्रयागस्थे श्रीरघुनाथकीर्तिपरिसरे 28.02.2021 तमे दिनाङ्के रविवासरे सायं 3-00 वादने ''दर्शनशास्त्रेषु अभिनवप्रवृत्तयः'' इति विषयमधिकृत्य एकदिवसीया राष्ट्रिया सङ्गोष्ठी अन्तर्जालमाध्यमेनायोजिता। अस्याः सङ्गोष्ठ्याः केन्द्रीयविषयः 'दर्शनशास्त्रेषु अभिनवप्रवृत्तयः' इति आसीत्। संगोष्ठ्याः संयोजकाः न्यायविभागाध्यक्षाः डा.सच्चिदानन्दस्नेहीमहोदयाः, अध्यक्षाः परिसरस्य निदेशकाः प्रो.बनमालीबिश्वालमहोदयाश्चासन्। अस्यां सङ्गोष्ठ्यां विशिष्टातिथित्वेन केन्द्रीयसंस्कृतविश्वविद्यालयस्य मुक्तस्वाध्यायपीठस्य निदेशकाः प्रो. सुकान्तकुमारसेनापतिमहोदयाः, मुख्यातिथित्वेन श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य(नवदेहली) दर्शनसङ्कायप्रमुखाः प्रो.हरेराममित्रपाठीवर्याः, सारस्वतातिथित्वेन श्रीलालबहादुरशास्त्री-राष्ट्रियसंस्कृतविश्वविद्यालयस्य(नवदेहली) प्रो.विष्णुपदमहापात्रमहोदयाः समुपस्थिता आसन्। अस्यां सङ्गोष्ठ्यां वैदिकमङ्गलाचरणं वेदविभागीयच्छात्रैः, लौकिकमङ्गलाचरणं दिनेशचन्द्रपाण्डेयेन, समागतानां स्वागतं विषयोपस्थापनं च सच्चिदानन्दस्नेहीमहोदयेन विहितम्। विशिष्टातिथिरूपेण प्रो.सुकान्तकुमारसेनापतिमहोदयेन 'दर्शनशास्त्रेषु अभिनवप्रवृत्तयः' इति केन्द्रीयविषयस्य बीजभाषणे दर्शनशास्त्रेषु नूतनप्रवृत्तीनां विषये एका विस्तृतपरम्परा प्रस्तुता, यया चिन्तनस्य नूतनमार्गः समेषां चिन्तने समागतः। ततः परं विशिष्टव्याख्यानं प्रो.हरेराममित्रपाठीमहोदयानां 'वर्तमानसन्दर्भे दर्शनशास्त्रीयपरम्परायामभिनवप्रवृत्तयः' इत्यस्मिन् विषये सञ्जातम्। वर्तमानसन्दर्भे दर्शनशास्त्रीयाचार्यपरम्परा कथं वर्तते, तत्र कथं दर्शनशास्त्रीयतत्त्वानां च समावेशो विद्यते? वर्तमानकाले दर्शनशास्त्रीयग्रन्थपरम्परायां नूतनग्रन्थाः ग्रन्थकाराश्च के के सन्तीति सुविस्तृतं तैः विवेचितम्। तदनन्तरं विष्णुपदमहापात्रमहोदयेन 'न्यायशास्त्रे अभिनवप्रवृत्तयः' इति विषयमधिकृत्य सारस्वतवक्तृत्वेन दार्शनिकशिक्षणप्रवृत्तिविषये स्वविशिष्टव्याख्यानं प्रस्तुतम्। अनन्तरं शोधपत्रवाचन सत्रस्यारम्भोऽभवत्, यत्र कुमारीनीलममहोदयया 'स्वामी विवेकानन्द के चिन्तन में व्यावहारिक वेदान्त, डा.अनिलकुमारेण दर्शनशास्त्रेषु अभिनवग्रन्थाः, डा.नितेशकुमारद्विवेदीना दर्शनेषु अनुमानप्रमाणम्, रीनादेव्या अभिनवगुप्तस्य दार्शनिकं चिन्तनम्, सोमकृष्णेन दर्शनशास्त्रीय-अभिनवग्रन्थकाराः, पुरुषोत्तमदाशेन दर्शनशास्त्रेषु अभिनवप्रवृत्तयः,

इति विषये, पुरषोत्तमदाशमहोदयेन 'दर्शनशास्त्रेषु अभिनवप्रवृत्तयः' इत्यस्मिन् विषये, डा. अरविन्दकुमारमहोदयेन न्यायदर्शने प्रमाणविमर्शः, डा.कृपाशङ्करशर्ममहोदयेन सांख्यप्रतिमः एक परिचय, विनयगोपालत्रिपठिना बालगङ्गाधरतिलककृत श्रीमद्भगवद्गीता रहस्य का दार्शनिक विवेचन, रोहितशर्मणा समाजोत्थाने समकालिकभारतीयदार्शनिकानां योगदानम्, श्रीरञ्जनेन Philosophy of life affirmation critique of history of world ideas शीर्षकान्वितं च शोधपत्रवाचनं कृतम्। कार्यक्रमस्यान्ते परिसरनिदेशकस्य प्रो. बनमालीबिश्वालमहोदयस्य आध्यक्षीयमभिभाषणमभवत्। तत्र च महोदयैः स्वरचितपाश्चात्यदर्शनकारिकामाश्रित्य अभिनवदार्शनिकग्रन्थपरम्पराविषये सम्यग्भाषणं कृतम्। महोदयानाम् आध्यक्षीयव्याख्यानं सरलं सारपूर्णं सुसंस्कृतं रमणीयञ्चासीत्। अध्यक्षाणामुद्बोधनानन्तरं सर्वेषां समुपस्थितानामतिथीनां प्रतिभागीनां कार्यालयकर्मिणां च धन्यवादज्ञापनं श्रीओमशर्ममहोदयेन कृतम्। शान्तिपाठेन कार्यक्रमः समाप्तिं गतः।

## सम्पन्ना व्याकरणविभागीया अन्ताराष्ट्रिया सङ्गोष्ठी



(व्याकरणविभागस्या सङ्गोष्ठ्याश्चित्रम्)

केन्द्रीयसंस्कृतविश्वविद्यालस्य श्रीरघुनाथकीर्तिपरिसरस्य व्याकरणविभागेन माघशुक्लतृतीयां 2077 तमे वैक्रमाब्दे रविवासरे तदनुसारेण 14.02.2021 तमे दिनाङ्के व्याकरणविभागीया एकदिवसीया अन्तर्जालीया अन्ताराष्ट्रिया शोधसङ्गोष्ठी समायोजिता। अस्यां सङ्गोष्ठ्यां मुख्यातिथिरूपेण श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. हरिहरहोता सभामुद्बोधितवान्। सारस्वतातिथिः प्रो. सदानन्ददाशः 'University of Leipzig, Germany' अपि व्याख्यानम् अकरोत्। प्रो.भगवत्शरणशुक्लः (व्याकरणविभागाध्यक्षः) धर्मविज्ञानसङ्कायः, बनारसहिन्दूविश्वविद्यालयः, वाराणसी ( उ.प्र.) सङ्गोष्ठ्यामुद्बोधितवान्। अस्याः सङ्गोष्ठ्याः आयोजकोऽध्यक्षश्च निदेशकः के.सं.वि.वि. देवप्रयागस्थश्रीरघुनाथकीर्तिपरिसरस्य प्रो.बनमालीबिश्वालमहोदयः अध्यक्षीयमभिभाषणं प्रस्तुतवान्, कार्यक्रमस्य संयोजनं श्रीरघुनाथकीर्तिपरिसरस्य व्याकरणोपाध्यायेन डॉ. श्री ओमशर्मणा कृतम्। अस्यां शोधसङ्गोष्ठ्यां देशस्थाः विदेशस्थाश्च विद्वांसः प्रो. भारतभूषणत्रिपाठी – डॉ.सच्चिदानन्दस्नेही – डॉ.प्रमोदकुमारशुक्ल – राममनोहरशर्मा – डॉ.नितेशद्विवेदी – डॉशैलेन्द्रप्रसादउनियाल – भूपेन्द्रकुमारगौतम –प्रियङ्कातिवारी – श्रेष्ठा – राजेशचन्द्रपोखरिया – संगीताकुमारी – श्वेता एम.के. – क्रिश्चनपिटरलोफर – धनेशकोटियाल – साध्वीदेवाश्रिता – डॉ.रीतातिवारीप्रभृतयः अन्यूनाः पञ्चाशद् विद्वांसो विदुष्यश्च भागं गृहीत्वा स्वकीयं वैदुष्यपूर्णं व्याख्यानञ्च प्रदत्तवन्तः। संयोजकेन डॉ.श्रीओमशर्मणा प्रस्तुतं सङ्गोष्ठी-प्रास्ताविकमत्र पाठकानां मोदाय प्रस्तूयते-

## प्रास्ताविकम्

शब्दशास्त्रं हि वेदानां वेदो वर्त्तते। "ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय, इन्द्रो भरद्वाजाय, भरद्वाजो ऋषिभ्यः,ऋषयो ब्राह्मणेभ्यः" (ऋक्तन्त्रम्1.4) इत्यादिना ज्ञायते यदस्य शास्त्रस्य सुदीर्घा परम्पराऽस्ति। एषा व्याकरणपरम्परा ब्राह्मपरम्परा-नाम्ना व्याकरणक्षेत्रे ख्याता। अस्या एव परम्परायाः शब्दपारायणरूपम् ऐन्द्रव्याकरणं सुप्रसिद्धं बभूव।

अथ च " नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम्। उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम् ॥ (नन्दिकेश्वरकाशिका-१) इत्यादिभिः प्रमाणैर्ज्ञायते यत् शब्दशास्त्रपरम्परायां द्वितीया परम्परा वर्तते माहेश्वरपरम्परा। पाणिनीयपरम्परायाः समावेशोऽत्रैव भवति । इदञ्च पाणिनीयं शास्त्रं पञ्चाङ्गपूर्णमतो विशिष्टतमं स्थानं भजते। उक्तञ्च पतञ्जलिना— सर्ववेदपारिषदं हीदं शास्त्रं, तत्र नैकः शक्यः पन्था आस्थातुम् (महाभाष्यम्-2.1.58)। अनया उक्त्या पाणिनीयं शब्दशास्त्रं सर्ववेदपरिषदां शिक्षा-कल्प-छन्दो-निरुक्त-ज्यौतिषादिभिस्सह सम्बन्धं स्थापयति। अतो नैके पन्थानोऽत्राश्रिताः। अतः पाणिनीय-परम्पराया अवसानं शब्दानुशासनपर्यन्तमेव नास्ति। अपितु अस्याः परम्परायाः प्रभूतः प्रभावो यथा व्याकरणशास्त्रे दृश्यते तथैव सांख्य-योग-न्याय-वैशेषिक-मीमांसा-वेदान्त-जैन-बौद्धादिदर्शनेषु तथा काव्येतिहासनाटकादिष्वपि परिलक्षितो भवति। एतस्य निदर्शनार्थं राक्षस-कालिदासयोः संवादप्रसङ्गे भोजप्रबन्धस्यैकं पद्यं द्रष्टव्यम्—

"सर्वस्य द्वे" सुमति-कुमती सम्पदापत्तिहेतू, "वृद्धो यूना" सह परिचयात्त्यज्यते कामिनीभिः।<br>
"एको गोत्रे" प्रभवति पुमान् यः कुटुम्बं बिभर्त्ति, "स्त्रीपुंवच्च" प्रभवति यदा तद्धि गेहं विनष्टम्।।

अस्मिन्नेव सन्दर्भे महासुभाषितसङ्ग्रहस्येदं पद्यं द्रष्टव्यम्—

आयातो वनमाली गृहपतिरालि समायातः।
स्मर सखि पाणिनिसूत्रं 'विप्रतिषेधे परं कार्यम्।।' (५१०९)

अनेन पाणिनिसूत्रसमूहमाध्यमेन प्रस्तुतलोकशिक्षणेन पाणिनीय-परम्परायाः काव्यशास्त्रे कीदृशः प्रभाव इत्यनुमातुं शक्यते।

जाम्बवतीविजयनामकस्य काव्यस्यापरं नाम पातालविजयमिति वर्त्तते। श्रीराजशेखरादीनां मते इदं काव्यं महर्षिपाणिनिविरचितमस्ति। तथैव वररुचिना (कात्यायनेन) प्रणीतं 'स्वर्गारोहणं' नामकं महाकाव्यम्, पतञ्जलेः महानन्दमयं काव्यम्, व्याडिविरचितं बलचरितं प्रसिद्धं वर्त्तते। महाकाव्यानां पाणिनीयपरम्परायां रावणवधमहाकाव्यस्य (भट्टिकाव्यस्य) अवदानं टीकाकारशिरोमणेः मल्लिनाथादिनामवदानञ्च साहित्यक्षेत्रे को विस्मर्त्तुं शक्नोति। पाणिनीयपरम्परायां महाभाष्य-वाक्यपदीय-मञ्जूषादिग्रन्थानामवलोकनेन ज्ञायते यत्पाणिनीयपरम्परायां दर्शनस्यातिविशिष्टतमं स्थानं वर्त्तते। अत एव भाषोत्पत्तिः शब्दाभिव्यक्तिः शब्दशक्तिः स्फोटः शब्दब्रह्म चेत्यादयः दार्शनिकविषया अत्र प्रामुख्येन वर्णिताः। रक्षार्थं वेदानामध्येयं व्याकरणम् इति वचनाद् व्याकरणस्य प्रमुखं लक्ष्यं वेदानां रक्षणं विद्यते इति ज्ञायते। वैदिकभाषा अत्यन्तमुत्कृष्टा भाषा वर्त्तते। तस्याः भाषायाः ज्ञानाय काले काले वैदिकभाष्याणां रचना जाता।

## पाणिनीयपरम्परायाः वैयाकरणाः

पाणिनेः सूत्राण्याधृत्य ये स्वशास्त्राणि रचयन्ति ते समकालिका उत्तरकालिका वा वैयाकरणाः पाणिनीयपरम्परायाम् आगच्छन्ति। अत्र केषाञ्चन पाणिनीयपरम्परायाः वैयाकरणानां नामग्रहणं तेषां ग्रन्थोल्लेखपूर्वकं क्रियते-

| आचार्यः | ग्रन्थः |
|---|---|
| कात्यायनः | वार्तिकम् |
| पतञ्जलिः | महाभाष्यम् |
| श्वोभूतिः, व्याडिः,कुडिः इत्यादयः | वृत्तिग्रन्थाः |
| वामन-जयादित्यौ | काशिका |
| अन्नम्भट्टः | पाणिनीयमिताक्षरा, प्रदीपोद्योतनम् |
| धर्मकीर्त्तिः | रूपावतारः |
| रामचन्द्राचार्यः | प्रक्रियाकौमुदी |
| भट्टोजिदीक्षितः | शब्दकौस्तुभः, सिद्धान्तकौमुदी |
| नागेशभट्टः | उद्योतः, शेखरत्रयी |
| विश्वेश्वरसूरिः | वैयाकरणसिद्धान्तसुधानिधिः |
| स्वामिदयानन्दः तथा अन्ये | प्रथमावृत्तिः,कारकीय-सामासिकेत्यादयः |

इत्थं पाणिनीयपरम्परायां निखिलसंस्कृतवाङ्मये कृतभूरिश्रमाः प्राच्य-पाश्चात्य-देशीयाश्च विद्वांसः समाविशन्ति। अतो निश्चप्रचं वक्तुं शक्नुमो यद्यत्वे पाणिनीयपरम्परायाः प्रभावः केवलं व्याकरणशास्त्रोपरि नास्त्यपितु सकलेऽपि संस्कृतवाङ्मये परिलक्ष्यते। अत एवोक्तं महाभाष्ये — आकुमारं यशः पाणिनेः। इति। (म.भा.1.4.89)

न केवलमुपर्युक्तानामपितु अन्येषामपि पाणिनीयपरम्परा-सम्बद्धानां प्राच्य-पाश्चात्य-देशीयानां विदुषां कार्यजातं रेखाङ्कयितुं तन्महत्त्वं च पुरस्कर्तुं देवप्रयागस्थस्य केन्द्रीय-संस्कृत-विश्वविद्यालयस्य श्रीरघुनाथकीर्ति-परिसरस्य व्याकरण-विभागेन 14.02.2021 तमे दिनाङ्के एकदिवसीया अन्ताराष्ट्रिया सङ्गोष्ठी आयोजिता। अस्यां सङ्गोष्ठ्यां संस्कृतवाङ्मये **'पाणिनीय-परम्परा'** इति विषये अनुसन्धानात्मको विमर्शो जातः। एतेन विमर्शेण अवश्यमेव संस्कृतव्याकरण-सम्बद्धा नूतनाः दिशः समुद्घाटिताः। एतस्मिन् विषये ये विशेषज्ञाः सन्ति। ते अस्याः सङ्गोष्ठ्याः विविध-सत्रेषु चैतद्विषयकं किमपि विशिष्टं व्याख्यानं, किमपि विशिष्टं शोधपत्रं वा प्रस्तूय सङ्गोष्ठीमिमां सफलीकृतवन्तः इति सप्रश्रयं संसूच्य हर्षमनुभवामः।

## अस्याः अन्ताराष्ट्रिय-सङ्गोष्ठ्या उपविषयाः

- पाणिनीयपरम्परायाः वेदभाष्यकाराः।
- पाणिनीयपरम्परायाः निरुक्तटीकाकाराः।



- पाणिनीयपरम्परायाः व्याकरणभाष्य-वृत्ति-प्रक्रिया-धातुपाठादेः प्रणेतारः।
- पाणिनीयपरम्परामाश्रित्य नूतनव्याकरणशास्त्रस्य रचयितारः।
- पाणिनीयपरम्परायाः साङ्ख्य-योगटीकाकाराः।
- पाणिनीयपरम्परायाः न्याय-वैशेषिकव्याख्यातारः।
- पाणिनीयपरम्परायाः मीमांसा-वेदान्तव्याख्यातारः।
- पाणिनीयपरम्परायाः ज्यौतिषशात्रस्य व्याख्यातारः।
- पाणिनीयपरम्परायाः धर्मशात्रस्य व्याख्यातारः।
- हिन्दी एवं प्रान्तीयभाषाओं के व्याकरणों में पाणिनिव्याकरण का उपयोग।
- The Influence of Paniniyan Grammar on the Grammar of European languages.

विद्वद्भिः अस्यां संगोष्ठ्यां मुख्यविषयसम्बद्धानि तथा उपविषयसम्बद्धानि च शोधपत्राणि प्रस्तुतानि।

## परिसरे अवशिष्टभवननिर्माणकार्यस्यारम्भः

केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरस्य स्थापना 16-06-2016 तमे दिनाङ्के सञ्जाता, 2017 तमे वर्षे अस्य प्रथमः शिलान्यासः उत्तराखण्डस्य राज्यपालेन महामहिम्ना डा.के.के.पालमहोदयेन कृतः। द्वितीयः शिलान्यासश्च 8-11-17 तमे दिनाङ्के भारतसर्वकारस्य मानवसंसाधनविकासराज्यमन्त्रिणा डा.सत्यपालसिंहमहोदयेन तथा उत्तराखण्डसर्वकारस्य उच्चशिक्षामन्त्रिणा डा.धनसिंहरावतमहोदयेन च कृतः। अत्रत्यादर्शसंस्कृतमहाविद्यालयेन तथा उत्तराखण्डसर्वकारेण च परिसरस्य कृते भूमिः प्रदत्ता। ततोऽत्र विस्तृतपरिसरस्य कल्पना जाता। पूर्वनिदेशकस्य महता प्रयासेन भवननिर्माणकार्यमत्र आरब्धम्, परञ्च देशे कोरोनाया यथा स्थितिरासीत् तथाभूतायामवस्थायां कार्यं सम्पूर्णतां नैव प्राप्तम्। पुनः मुख्यालयतः एका समितिः समागता, कुत्र कुत्र कार्यमवशिष्टम्, कथं तत्पूरणीयम् एतत्सर्वं तया समीक्षितम्। एवं पुनः अवशिष्टभवननिर्माणकार्यार्थं सर्वे कृतसङ्कल्पाः अभवन्। तस्माद् जूनमासस्य 22 तमे दिनाङ्के भवननिर्माणाधिकारिभिस्तथा तत्कर्मचारिभिस्सह परिसरनिदेशकेन प्रो.बनमालीबिश्वालेन अवशिष्टभवननिर्माणाय परिसरस्य नूतनभवने पूजाकार्यक्रमः समायोजितः। वेदविभागाध्यक्षेण डा.शैलेन्द्रप्रसादउनियालमहोदयेन शास्त्रोक्तविधिना सम्पूर्णं पूजनकर्म सम्पादितम्, तत्र पूजनकर्मणि नूतनप्राध्यापकेन डा.अमन्दमिश्रमहोदयेनापि सहयोगः कृतः। अस्मिन्नवसरे साहित्यविभागस्य डा.अनिलकुमारः, पुस्तकालयाध्यक्षः श्रीनवीनडोबरियालः तथाऽन्ये सर्वे नवनियुक्ताः प्राध्यापकाः जनार्दनसुवेदी-डॉ.मनीषशर्म-डॉ.मधुसूदनपाण्डेयादयः कर्मचारिणश्च समुपस्थिता आसन्।



(देवं पूजयन्तः निदेशकाः परिसरसदस्याश्च)

## परिसरे औषधिसम्मार्जनम् समभवत्

कोरोनाया द्वितीय-लहर-प्रभावात्सम्पूर्णदेशः पुनः पीडितो जातः। अतः उत्तराखण्डसर्वकारेण एकः आदेशः प्रसारितो यत्- सर्वासु संस्थासु औषधिना सम्मार्जनं निःशुल्करूपेण करणीयमिति। अतः श्रीरघुनाथकीर्तिपरिसरेणापि तदनुगुणम् औषधिसम्मार्जनस्य व्यवस्था सुनिश्चिता। तत्कृते परिसरनिदेशकस्य सङ्कल्प एव निश्चितरूपेण कारणमासीत्, यतोहि तेषामेव जागरूकता तथा विद्यते। 25.04.2021 तमे दिनाङ्के रविवासरे देवप्रयागस्य नगरपालिकया सम्पूर्णपरिसरभवनानि औषधिना सम्मार्जितानि। येषां सहयोगेन कार्यमिदं सम्पूर्णतामगात् तेषु श्रीबिष्टमहोदयः, श्रीकृष्णकान्तकोटियालश्च मुख्यौ आस्ताम्। यतोहि नगरपालिकाप्रमुखयोरनयोः आदेशं स्वीकृत्य औषधिसम्मार्जकौ द्वौ समागत्य सम्पूर्णपरिसरम् औषधिना सम्मार्जितवन्तौ। परिसरस्य साहित्यविभागस्य प्राध्यापकः डा.अनिलकुमारः, पुस्तकालयस्य कर्मचारी अनुरागः, परिसरस्य कर्मचारी अनिलः, सुरक्षाकर्मचारी अनूपभट्टः चैते सर्वे अवसरेऽस्मिन् परिसरे सहयोगार्थमुपस्थिताः आसन्।



(औषधिसम्मार्जनं कुर्वन् सुरक्षाकर्मचारी)

## सम्पन्ना केन्द्रीयसंस्कृतविश्वविद्यालयस्य परीक्षा

छात्राणाम् अध्ययनं यथा आवश्यकम्, तथैव तेषां परीक्षा अपि आवश्यकी। यया च छात्राधीतविषयावबोधस्य ज्ञानं भवति। अतः सर्वेषां छात्राणां परीक्षा आवश्यकी भवति। केन्द्रीयसंस्कृतविश्वविद्यालये 2019-20 तमे वर्षे कोरोनाप्रभावात्सर्वेषां छात्राणां परीक्षा नैवाभवत्, केवलम् अन्तिमवर्षे ये छात्रा आसन् तेषामेव परीक्षा सञ्जाता। परञ्च 2020-21 तमे वर्षे प्रथमसत्रस्य समेषां शास्त्री-आचार्यकक्षाणां परीक्षा 15.03.2021 दिनाङ्कात् 08.04.2021 दिनाङ्कपर्यन्तं सम्पन्ना। इयं परीक्षा अन्तर्जालमाध्यमेन समायोजिता। अस्याः अन्तर्जालीयं सञ्चालनं साहित्यविभागस्य प्राध्यापकेन डा.अनिलकुमारेण, सङ्गणकविषस्य प्राध्यापकेन श्रीपङ्कजकोटियालमहोदयेन च कृतम्। व्हाटसैपमाध्यमेन प्रत्येकं कक्षायाः समूहान् निर्माय तेन समूहमाध्यमेन समेषां प्रश्नपत्राणां प्रेषणम् उत्तरपुस्तिकानां च श्रीपङ्कजकोटियालस्य व्हाटसैपमध्ये एकत्रीकरणं यथा कृतम्, तेन प्रकारेणात्यन्तं सुष्ठुरूपेण परीक्षा सम्पन्ना अभवत्।

## परिसरेण सम्पादितं नैक (NAAC) सम्बद्धकार्यम्

राष्ट्रियसंस्कृतसंस्थानस्य नामकरणं केन्द्रीयसंस्कृतविश्वविद्यालयरूपेण यदा अभवत् तत एव आरभ्य अस्य विश्वविद्यालयस्य राष्ट्रिय- मूल्याङ्कन- प्रत्यायन- परिषदा 'ग्रेड'- स्वीकरणमपि आवश्यकं सञ्जातम्। अत एव अस्य विश्वविद्यालयस्य सर्वाः सूचनाः छात्राणां स्युः, प्राध्यापकानां वा, सर्वं तत्र प्रेषणात्परं यावत्पर्यन्तं तासां सर्वासां सूचनानां निरीक्षणादिकं कार्यं सम्पादितं नैव भवति तावत्पर्यन्तं विश्वविद्यालयाय समुचितं 'ग्रेड' नैव प्रदीयते। अतो मुख्यालयस्यादेशानुसारं सर्वैः परिसरैः क्रमबद्धा सर्वाः सूचनाः सज्जीकृताः। श्रीरघुनाथकीर्तिपरिसरेणापि तत्सम्बद्धाः सूचनाः सज्जीकर्तुम् एका समितिः निर्मिता, यस्याः संयोजकत्वेन न्यायविभागस्य प्राध्यापकः डा.सच्चिदानन्दस्नेही मनोनितः। सर्वैः प्राध्यापकैः सप्ताहाभ्यन्तरे सर्वाः सूचनाः सज्जीकृताः। ताश्च परिसर-निदेशकेन मुख्यालयं प्रति प्रेषिताः। एवं सर्वेषां सहयोगेन एकं महनीयं कार्यं सम्पादितं यस्य पृष्ठे च परिसरनिदेशकमहोदयस्योत्साहभावः कारणमासीत्, यतोहि तैर्वारं वारं सर्वे तत्कार्याय प्रेरिताः। तया च प्रेरणया कार्यमिदं मुख्यालये प्रेषणावधितोऽपि पूर्वमेव प्रेषितम्।

## ग्रीष्मावकाशः

सम्पूर्णदेशे यद्यपि कोरोनायाः प्रभावो बृहद्रूपेण वर्तते तथापि सर्वाणि नियमितकार्याणि कथमपि प्रचलन्त्येव। छात्रणाम् अध्ययनं स्यादथवा तेषां परीक्षा, कार्यालयस्य कार्याणि भवन्तु अथवा प्राध्यापकानां विश्वविद्यालये आगमनं प्रशिक्षणं वा। छात्राणां परीक्षानन्तरं विश्वविद्यालयेन 22-05-2021 दिनाङ्कात् 06-06-2021 दिनाङ्कपर्यन्तं ग्रीष्मावकाश उद्घोषितः। बहवः प्राध्यापकाः अवसरेऽस्मिन् स्वगृहेऽपि गताः। 07-06-2021तमे दिनाङ्के परिसरः पुनः द्वितीयसत्रार्थम् उद्घाटितः। सर्वैः प्राध्यापकैः पुनरन्तर्जालमाध्यमेनाध्ययनमध्यापनञ्च प्रारब्धम्।

## स्मृतिशेषाः विद्वांसो रचनाकाराश्च

दौर्भाग्यात् प्रो.अशोककालियामहोदयाः लखनऊविश्वविद्यालयस्य संस्कृतविभागस्य आचार्याः, सम्पूर्णासंस्कृतविश्वविद्यालयस्य च पूर्वकुलपतयः कोरोनाकारणादस्मिन् वर्षे दिवङ्गताः। एवमेव लखनऊविश्वविद्यालयस्य संस्कृतविभागे आचार्यरूपेण विद्यमानानां प्रो.ब्रजेशशुक्लमहोदयानामपि कारोनाकारणादेवास्मिन् वर्षे देहावसानमभवत्। एवमेव प्रो.रेवाप्रसादद्विवेदीमहोदयाः काशीहिन्दूविश्वविद्यालयस्य धर्मविज्ञानसङ्कायस्य पूर्वाचार्याः, ये खलु संस्कृतजगति विख्याताः शास्त्रज्ञाः, कवयः, नैकैः पुरस्कारैः समलङ्कृतश्चासन् तेषामपि अस्मिन् वर्षे मईमासे महानिवार्णं जातम्। वस्तुतः एतेषां विदुषामभावेन संस्कृतक्षेत्रे महती क्षतिः सञ्जाता।



(प्रो.ब्रजेशशुक्लमहोदयाः)



(प्रो.अशोककालियामहोदयाः)



(प्रो.रेवाप्रसादद्विवेदीमहोदयाः)

## आधुनिकसंस्कृतसाहित्यसंसाधनकेन्द्रेण समायोजिता राष्ट्रिया सङ्गोष्ठी



(अन्तर्जालमाध्यमेन समुपस्थिता: सम्मानितजना:)

छात्रेषु आधुनिकसंस्कृतसाहित्यं प्रति रुचिमुत्पादयितुम्, परिसरे चाधुनिकग्रन्थानां अभिवृद्धये च परिसरनिदेशकस्य प्रो.बनमालीबिश्वालमहोदयस्य महत्प्रयासेन श्रीरघुनाथकीर्तिपरिसरे आधुनिकसंस्कृतसाहित्यसंसाधनकेन्द्रस्य स्थापना 2017 तमे वर्षे सञ्जाता। तेन केन्द्रेणास्मिन् वर्षे 'समकालिकसंस्कृतसाहित्ये बालसाहित्यम्' इति विषयमङ्गीकृत्य 14-05-2021 तमे सङ्गोष्ठ्याः आयोजनं कृतम्। तत्र मुख्यवक्तृत्वेन विश्वभारतीति संस्थायाः सस्कृत-पालि-प्राकृतविभागाध्यक्षाः प्रो.अरुणरञ्जनमिश्रमहोदयाः समुपस्थिता आसन्। कार्यक्रमस्यारम्भः वैदिकमङ्गलाचरणेन वेदविभागस्य प्राध्यापकेन डा.शैलेन्द्रप्रसादउनियालमहोदयेन विहितम्। विषयप्रवर्तनं डा.अनिलकुमारेण, स्वागतभाषणं डा.कृपाङ्करशर्मणा च विहितम्। प्रो.अरुणरञ्जनमिश्रमहोदयेन बालसाहित्यस्य या विकासपरम्परा विद्यते तस्याः परम्परायाः विस्तरेण परिचयः प्रस्तुतः। बालसाहित्ये कीदृशं लालित्यं विद्यते, न केवलं बाला अपि तु ज्ञानवृद्धा अपि तथाभूतं काव्यं लेखितुं पठितुं च प्रयतन्ते इति तेन सम्यक्तयोपस्थापितम्। अनन्तरं 35तोऽपि अधिकैः शोधपत्रवाचकैः शोधपत्रमाध्यमेन गम्भीरचिन्तनमपि प्रस्तुतम्। सङ्गोष्ठ्याः अध्यक्षरूपेण विराजमानेन परिसरनिदेशकेन प्रो.बनमालीबिश्वालमहोदयेन बालसाहित्यस्य लक्षणम्, बालसाहित्यस्य भेदाः, बालसाहित्यस्य परम्परा, वर्तमानसन्दर्भे तस्य आवश्यकता चेत्यादीनां विषयाणामुपरि गम्भीरं विवेचनं कृतम्, अन्ते च बालसाहित्यसम्बद्धकाव्यमपि प्रस्तुतम्। अन्ते च डॉ.दिनेशचन्द्रपाण्डेयमहोदयेन समुपस्थितानां सर्वेषां धन्यवादज्ञापनं कृतम्। बालसाहित्यस्य प्रस्ताविकं डा.अनिलकुमारेण यत्प्रस्तुतं तदेवम्-

संस्कृतसाहित्ये सर्वेषां बालयुववृद्धानां कृते काव्यानि विरचितानि दृश्यन्ते, परञ्च बालानां सुखबोधाय नातिविस्तरेण काव्यरचनाप्रवृत्तिरवलोकिता प्राचीनसाहित्ये। यद्यपि संस्कृतजगति सर्वोच्चस्थानलब्धानां पञ्चतन्त्रहितोपदेशसदृशग्रन्थानां रचनोद्देश्यमिदमेव प्रतीयते। आधुनिकसंस्कृतसाहित्ये विषयेऽस्मिन् विदुषामेका विस्तृतपरम्परा विद्यते। अस्यां परम्परायां बालगीतानाम्, बालनाटकानाम्, बालकथानाञ्च रचना विद्वद्भिः कृता। आचार्यबनमालीबिश्वालमहोदयेन बालसाहित्यस्य व्याख्यायां निगदितम्- 'बालस्य बालानां (कृते) च तत् साहित्यम्। अथवा बालं बालान्(अधिकृत्य वा) यत् साहित्यम्। अथवा बालेन बालैर्वा रचितं यत् साहित्यम्। अथवा बालं च तत् साहित्यम्' इति। बालानां साहित्यं बालानां कृते वा यत् साहित्यं विरच्यते तदेव बालसाहित्यमिति नाम्ना विख्यातम्। बालः कः इत्यस्मिन् विषये शास्त्रेषु विभिन्नानि लक्षणानि सन्ति परञ्चात्र बालशब्देन वयसा बाल इत्यर्थः अवगन्तव्यः। वस्तुतो न बालसाहित्यस्य कापि परिभाषा शास्त्रेषूल्लिखिता। पाश्चात्यसाहित्ये कुत्रचिदवलोक्यते यथा नान्सीआन्डर्सनमहोदयस्य। बालसाहित्यम् अत्यन्तसरलम्, शिक्षाप्रदम्, बालोपयोगि च स्यादित्यावश्यकम्। अस्य विभाजनं द्विधा कर्तुं शक्यते-प्रथमं तावत् प्राचीनम् द्वितीयम् अर्वाचीनम्। प्राचीनसाहित्ये सरलमन्त्राः, श्लोकाः, सूक्तयः, सुभाषितानि च स्वीकर्तुं शक्यन्ते। आधुनिकसाहित्ये शिक्षाप्रदानि लघूनि गीतिकानि, चाटुश्लोकाः, प्रहेलिकाः, प्रश्नोत्तराणि, प्रवचनानि, समस्यापूर्तयः, कथाः, काव्यानि, कविताः, स्तोत्राणि, चरितकाव्यानि, देशभक्तिपरककाव्यानि च प्रसिद्धानि। यथा प्रश्नोत्तरस्योदाहरणम्- कं सञ्जघान कृष्णः। उत्तरम्- कंसं जघान कृष्णः एवमेवान्यान्युदाहरणानि। अस्यां बालसाहित्यस्य विकासपरम्परायाम् अभिराजराजेन्द्रमिश्र-हरिदत्तशर्म-हर्षदेवमाधव-केशवचन्द्रदाश-आचार्यदिगम्बरमहापात्र-गौरीकुमारब्रह्मा- बनमालीबिश्वाल- जनार्दनहेगडे- एचआरविश्वास-इच्छारामद्विवेदि-सम्पदानन्दमिश्र-नारायणदाश -प्रशस्यमित्रशास्त्रि- सत्यनारायणआचार्यसदृशा बहवः काव्यकर्तारः सञ्जाताः। सुभाषितकाव्येषु यथा दीनबन्धुभञ्जस्य सुभाषितपुष्पकम्, सुरेन्द्रमोहनस्य सूक्तिद्विशती, स्तोत्रकाव्येषु सदाशिवप्रहराजस्य स्तुतिमालिका, बैकुण्ठबिहारीनन्दशर्मणः शरणागतिस्तोत्रम्, चरितकाव्येषु पुण्डरिकाक्षमिश्रस्य सुदामचरितम्, गोविन्दचन्द्रमिश्रस्य संक्षिप्तश्रीमद्गान्धीचरितामृतम्, भागवतप्रसाददाशशर्मणः शशिभूषणचरितम्, बनमालीबिश्वालस्य जगन्नाथचरितम्, रवीन्द्रपण्डामहोदयस्य मलालाचरितम्, बालोपन्यासेषु केशवचन्द्रदाशस्य पताका, बालकथासु केशवचन्द्रदाशस्य एकदा, बालहास्यकाव्येषु सम्पदानन्दमिश्रस्य हास्यमञ्जरी, बालनाटकेषु रवीन्द्रपण्डामहोदयस्य यो मे भक्तः स मे प्रियः, अनूदितबालनाटकेषु बनमालीविश्वालस्य पत्रालयः चेत्यादिनि काव्यानि बालसाहित्यस्य विकासपरम्परायां प्रसिद्धानि ।

सङ्गोष्ठ्यां विचारणीया बिन्दवः एते आसन यान् अधिकृत्य विद्वद्भिः विचाराः प्रकटी कृताः।

1-बालकथासाहित्यम्, 2-बालगीतसाहित्यम् , 3-बालस्तोत्रसाहित्यम्, 4-बालसाहित्यस्य भेदोपभेदाः,
5-बालोपन्याससाहित्यम्, 6-बालनाटकसाहित्यम्, 7-वर्तमानबालसाहित्यकाराः, 8-बालपत्रिकासाहित्यम्,
9-बालसुभाषितसाहित्यम्, 10- बालकवितासाहित्यम्, 11- शिशुगीतसाहित्यम्, 12-अनूदितबालसाहित्यम् च।

## पाण्डुलिपिसंरक्षणानुसन्धानकेन्द्रेण समायोजिता राष्ट्रिया सङ्गोष्ठी

भारतस्य प्राचीनग्रन्थानां संरक्षणं तेषु ग्रन्थेषु निहितानां विषयवस्तूनामनुसन्धाञ्च सर्वेषां विद्यानुरागिणां कर्त्तव्यं विद्यते। सर्वासु शैक्षणिकसंस्थासु एतादृशानां पाण्डुलिपिग्रन्थानां संरक्षणार्थं विविधा उपायाः क्रियन्ते विद्वद्भिः। एवमेव श्रीरघुनाथकीर्तिपरिसरेऽपि अस्मिन् प्रसङ्गे पाण्डुलिपिसंरक्षणानुसन्धानकेन्द्रस्य स्थापना प्रो.बनमालीबिश्वालमहोदयस्य प्रयासेन सञ्जाता। पाण्डुलिपीनां संरक्षणं कथं भवेत्, कथं च छात्राणां विषयेऽस्मिन् रुचिरुत्पन्ना स्यात् तदर्थं पाण्डुलिपिसंरक्षणानुसन्धानकेन्द्रेण 15-05-2021 तमे दिनाङ्के एका अन्तर्जालीया राष्ट्रिया सङ्गोष्ठी सङ्कल्पिता। तत्र डा.सुरेशशर्मणा प्रस्तुतेन वैदिकमङ्गलाचरणेन कार्यक्रमस्यास्यारम्भोऽभवत्। डा.सच्चिदानन्दस्नेहीमहोदयः सर्वेषां समुपस्थितानां स्वागतभाषणेन स्वागतं कृतवान्। अस्याः सङ्गोष्ठ्याः संयोजकेन साहित्यविभागाध्यक्षेण प्रो-विजयपालशास्त्रिणात्र विषयप्रवर्तनं विहितम्।



(पाण्डुलिपेः सङ्गोष्ठ्या मुखपृष्ठः)

सङ्गोष्ठ्यामस्यां मुख्याभिभाषणं प्रदातुं प्रो.श्वेताप्रजापतिः (निदेशिका, ओरियन्टल-रिसर्च-इन्स्टीट्यूट,म.स.वि.वि.बडौदा, गुर्जरप्रदेशः) समाहूता आसीत्। यया पाण्डुलिपीनां संरक्षणं कथं भवति, किमर्थमत्र अनुसन्धानस्यावश्यकता वर्तते, पाण्डुलिपीनामनुसन्धाने काः काः समस्याः समागच्छन्ति एतत्सर्वम् अत्यन्तगम्भीरतया प्रतिपादितम्। तदनन्तरं 45 तोऽपि अधिकाः शोधपत्रवाचकाः स्वकीयशोधपत्रमाध्यमेन पाण्डुलिपिविषये स्वविचारान् समुपस्थापितवन्तः। सङ्गोष्ठ्याः अध्यक्षेण परिसरनिदेशकेन प्रो.बनमालीबिश्वालमहोदयेन पाण्डुलिपिमाश्रित्यैका विस्तृता चर्चा कृता, यस्यां पाण्डुलिपीनाम् अनुसन्धानस्य का आवश्यकता, लिपीनां ज्ञानं कथं कर्त्तव्यम्, तासाम् अध्ययने कानि कानि तत्त्वानि आवश्यकानि इत्यादयः बिन्दवः मुख्या आसन्। तदनन्तरं वेदविभागस्य प्राध्यापकेन डा.शैलेन्द्रप्रसादउनियालमहोदयेन सर्वेषां समुपस्थितानां धन्यवादः ज्ञापितः। एवं श्रीरघुनाथकीर्तिपरिसरस्य पाण्डुलिपिसंरक्षाणानुसन्धानकेन्द्रेण समायोजितेयं हस्तलेखसम्पादनविधिविषयिणी सङ्गोष्ठी। प्रस्तुत सङ्गोष्ठ्या उद्देश्यमेवं विद्यते-अद्यत्वे पाण्डुलिपि-विज्ञानस्याध्ययनं प्रति विद्यार्थिनामभिरुचिस्संवर्धिता एव। एम.फील.–विद्यावारिधि (पी.एच्.डी)-प्राक्-शोधपाठ्यक्रमेषु (Pre-Ph.D.Cource) निर्धारितानुसन्धान-पद्धति-(ReSearch-Methodology)-पाठ्यक्रमेष्वपि हस्तलेख-शास्त्रमांशिकरूपेण योजितमस्ति। अत एवाद्यत्वे भारतवर्षस्य विविधसंस्थाभिः विविध-स्थलेषु मासिक्यः त्रिसप्ताहात्मिक्यो वा कार्यशालास्समायोज्यन्ते। ताश्च क्वचित् प्रारम्भिक्यः क्वचिदुच्चस्तरीयाश्च भवन्ति। नवदेहल्लीस्थ-राष्ट्रिय-पाण्डुलिपिमिशन (NMM) द्वारा प्रकाशितायां कृतिरक्षणाख्यायां द्वैमासिक-पत्रिकायां तथा चान्य-शोधपत्रिकासु चैतद्विषयक-लेखाः प्रकाशिताः भवन्ति। राष्ट्रिया अन्ताराष्ट्रियाश्च सङ्गोष्ठयोऽपि समायोज्यन्ते। पाण्डुलिपि-विज्ञाने सामान्यतया एते विषया अन्तर्भवन्ति। तद् यथा हस्तलेख-स्वरूपं तद्भेदाश्च, हस्तलेख-भौतिक-साधनानि, हस्तलेख-ग्रन्थरचन-प्रक्रिया, लिपिपरम्परा, लेखनकलाया उत्पत्तिर्विकासश्च, लेखक-लिपिकाराणां गुण-दोष-विवेचनम्, शास्त्र-सम्मत-लेखक-प्रकाराः लेखन-प्रकाराश्च, लेखनोत्कर्षहेतवः, हस्तलेख-संरक्षणस्य विविधोपायाः, पाण्डलिपिविज्ञानप्रसङ्गे अनुसन्धान-पद्धतिः शोधप्रविधिर्वा, हस्तलेखसम्पादनविधिः तथा सङ्केताङ्क-स्वरूपनिरूपणञ्चेत्यादयः। केन्द्रीय-संस्कृत-विश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरे पाण्डुलिपिसंरक्षणानुसन्धान-केन्द्रमुद्घाटितं वर्तते। तदन्तर्गतं बहवः परियोजनाः, कार्यक्रमाः तथा अन्याः सम्बद्धाः गतिविधयश्च सुनिश्चिता वर्तन्ते। किन्तु प्रारम्भिके स्तरे अस्माभिः काश्चन कार्यशालाः सङ्गोष्ठयश्च आयोक्ष्यन्ते। तस्मिन् क्रमे 15.05.2021 तमे दिनाङ्के एषा एकदिवसीया अन्तर्जालीया सङ्गोष्ठी आयोजिता। सङ्गोष्ठ्या विषया वर्तते आसीत्- हस्तलेखसम्पादनविधिः। यथा सर्वे जानन्ति भारतवर्षे इदानीमपि बहवः दुर्लभग्रन्थाः हस्तलेखरूपेण अप्रकाशिता वर्तन्ते येषां सम्पादनं प्रकाशनञ्च परमावश्यकम्। प्रकाशितेषु ग्रन्थेष्वपि बहवः पाठदोषाः दरीदृश्यन्ते। तेषामपि ग्रन्थानां उपलब्ध-हस्तलेखाधारेण समीक्षात्मकं सम्पादनमावश्यकम्। एतत् कार्यं केवलं विद्वांसः करिष्यन्तीति नास्ति नियमः। ये च शोधार्थिनः गवेषकाश्च शोधोपाधये शोधकार्यं कुर्वन्ति तेऽपि अप्रकाशितानां, प्रकाशितानाञ्च हस्तलेख-ग्रन्थानां सम्पादनं, समीक्षात्मकं सम्पादनमध्ययनञ्च कर्तुमर्हन्ति। एतत्क्रमे याः समस्याः

भवन्ति तासां समाधानं कथं भवेदिति मनसि निधाय तेषां गवेषकानां शोधार्थिनाञ्च मार्गदर्शनं कर्तुमियं राष्ट्रिया सङ्गोष्ठी परिकल्पिता वर्तते। परस्परविचारविनिमयेन चैतद्विषये किञ्चिद्दिशा-निर्धारणमप्यभवत्। सङ्गोष्ठ्या उपविषयाः-

* हस्तलेख-सम्पादन-स्वरूपं तद्भेदाश्च
* हस्तलेख-सम्पादन-सम्बद्धाः विविधाः पक्षाः
* हस्तलेख-सम्पादन-प्रक्रियायां सम्पादकस्य भूमिका
* पाठालोचन-सम्बद्धा विविध-पक्षाः
* मूलपाठान्वेषणं हस्तलेख-वंशवृक्षनिर्माणञ्च
* पाठसंस्कारः शुद्धपाठ-निर्धारणञ्च
* हस्तलेखानामन्तरङ्ग-परिचयः
* हस्तलेख-सम्पादने पुष्पिकानां भूमिका
* एकल-हस्तलेख-सम्पादने विविधाः समस्याः
* हस्तलेखानां समीक्षात्मकसम्पादने विविधाः समस्याः



एवमन्येऽपि ते सर्वे सम्बद्धाः विषया अस्यां सङ्गोष्ठ्यां विचारिताः।

## विभिन्नपदेषु साक्षात्कारः

संस्कृतविश्वविद्यालयेषु केन्द्रीयसंस्कृतविश्वविद्यालयः सम्पूर्णभारते बृहत्तमो विद्यते। अस्य परिसराः, आदर्शमहाविद्यालयाश्च सर्वेषु प्रदेशेषु सन्ति। छात्राणां संख्यादृष्ट्या क्वचिद् प्राध्यापकानां संख्या न्यूनैव विद्यते। श्रीरघुनाथकीर्तिपरिसरेऽपि एतादृशी स्थितिरासीत् - व्याकरणे द्वौ, न्याये एकः, वेदे एकः, ज्योतिषे द्वौ तथा अन्येषु विभागेष्वपि न्यूना एव आसन्। अतः परिसरनिदेशकेन अन्येषां प्राध्यापकानामपि अत्र नियुक्तिर्भवेदिति आशयेन अनेकवारं पत्राणि प्रेषितानि। अन्ते मुख्यालयेन चतुर्षु विभागेषु व्याकरणन्यायवेदज्योतिषविषयेषु क्रमेण एकमेकं पदमाहत्य च चत्वारि पदानि अस्य परिसरस्य कृते स्वीकृतानि। येषां साक्षात्कारोऽन्तर्जालमाध्यमेन मईमासस्य 21-22 इत्यनयोः दिनाङ्कयोर्जातः। तत्कृते निदेशकमहोदयस्य निर्देशानुसारम् एका समितिः निर्मिता या प्रमाणपत्राणां निरीक्षणम्, योग्यानां सूचीनिर्माणम्, योग्यसदस्यानां सूचीं परिसरस्यामुखपटले स्थापितवती। अनन्तरम् अन्तर्जालमाध्यमेन तेषां साक्षात्कारव्यवस्थां च कृतवती। अस्यां समितौ डा.अनिलकुमारः(साहित्यविभागः), श्रीनवीनडोबरियालः (पुस्तकालयाध्यक्षः), श्रीपङ्कजकोटियालश्च (सङ्गणकप्राध्यापकः) आसन्। एतैः सम्पूर्णकार्यं सुष्ठुतया सम्पादितम्। साक्षात्कारे चिताः प्राध्यापकाः जूनमासस्य एकविंश-दिनाङ्के परिसरे समागताः। डॉ.मनीषकुमारशर्मा व्याकरणे, श्रीअमन्दमिश्रः वेदे, डॉ.मधुसूदनपाण्डेयः ज्योतिषे तथा श्रीजनार्दनसुवेदी च न्याये। एतेषाम् आगमनेन छात्राणाम् अध्ययनसमस्यानां समाधानं बह्वंशेन सम्भविष्यति। एवं छात्राणां संख्याऽपि वृद्धिमाप्स्यति।

## श्रीरघुनाथकीर्तिपरिसरे समायोजिता विश्वपर्यावरणदिवसे राष्ट्रिया सङ्गोष्ठी

प्रकृतेः संरक्षणम् अस्माकं सर्वेषां दायित्त्वं विद्यते। वस्तुतः पर्यावरणं शुद्धं भविष्यति चेद् अस्माकं जीवनमपि स्वस्थं भविष्यति। पर्यावरणसंरक्षणं प्रति सर्वेषां जनानां ध्यानाकर्षणाय भारतसर्वकारेण 1972तमे वर्षे जूनमासस्य 5 दिनाङ्के विश्वपर्यावरणदिवसत्वेन निर्धारितः। ततः आरभ्य अधुनापर्यन्तं प्रतिवर्षं जूनमासस्य 5मे दिनाङ्के सर्वासु सर्वकारीयसंस्थासु विश्वपर्यावरणदिवसस्यायोजनं भवति। केन्द्रीयसंस्कृतविश्वविद्यालयस्य देवप्रयागस्थेन श्रीरघुनाथकीर्तिपरिसरेणापि महतोल्लासेनायं दिवसः परिपालितः। परिसरनिदेशकानां प्रो.बनमालीबिश्वालमहोदयानामाध्यक्ष्ये अवसरेऽस्मिन् 'सांस्कृतिक एवं प्राकृतिक पर्यावरण चेतना' इति विषयमधिकृत्य एका राष्ट्रिया सङ्गोष्ठी समायोजिता। अस्यां सङ्गोष्ठ्यां मुख्यातिथित्वेन श्रीमहीपालसिंहनेगीमहोदयः (वरिष्ठपत्रकारः पर्यावरणविच्च उत्तराखण्डः), मुख्यवक्तृत्वेन डा.गजेन्द्ररावतमहोदयः (वैज्ञानिकः, उत्तराखण्ड स्पेस एप्लीकेशन सेंटर देहरादूनम्), विशिष्टवक्तृत्वेन डा.शिवदत्तआर्यः (शिक्षावित् श्रीला.ब.शा.रा.सं.वि.वि.नवदेहली), सारस्वतातिथित्वेन श्रीआलोकसिंहजायरा (शोधविद् आई.सी.ए.आर. पन्तनगरम्, उत्तराखण्डः) च समुपस्थाय उद्बोधितवन्तः। कार्यक्रमस्यारम्भो वैदिकमङ्गलाचरणेन डा.शैलेन्द्रप्रसादउनियालमहोदयेन कृतः। सर्वेषां समागतानां स्वागतं डा.वीरेन्द्रबर्त्वालमहोदयेन विहितम्। डा.अरविन्दगौरमहोदयेन पर्यावरणस्यैतिह्यमुपस्थापयता तस्य दिवसस्य स्वीकारे किमौचित्यमिति प्रस्तूय विषयप्रवर्तनं कृतम्। तदनन्तरं श्रीमहीपालसिंहनेगीमहोदयेन उत्तराखण्ड-लोकगीतेषु कथं पर्यावरणचेतना विद्यते, कथं उत्तराखण्डस्य लोकसंस्कृतिः पर्यावरणं प्रति स्वकर्त्तव्यं निर्वहतीति प्रतिपादितम्। अपरं च तेन पर्यावरणमूलकानि लोककाव्यान्यपि प्रस्तुतानि। डा.गजेन्द्ररावतमहोदयेन वैज्ञानिकदृष्ट्या पर्वतीयक्षेत्रेषु पर्यावरणसंरक्षणं कथं कर्तुं शक्यते, कथम् अनावश्यकरूपेण यानि कार्याणि प्रकृतिं दूषयन्ति तानि रोद्धव्यानीति प्रतिपादितम्। डा.शिवदत्तआर्यः भारतीयसंस्कृतौ कथं पूर्वतः एव

पर्यावरणविषये मानवानां व्यवहारः आसीत्, कथम् अधुना वयं प्राचीनसंस्कृतिविस्मरणकारणात्कोरोनामहामार्यां समापतिताः इति सूष्ठूक्तवान्। श्रीआलोकसिंहजायरामहोदयेन पर्यावरणस्य कृषिक्षेत्रे कथं प्रभावो भवति, जैविकतत्त्वानां समावेशेन कथं कृषकाः सुष्ठुतया अन्नादिकमुत्पादयितुं समर्थाः भविष्यन्ति इति विस्तरेण समुपस्थापितम्। तदनन्तरं श्रुतिसंस्कृतिद्वारा पर्यावरणविषयकं तथ्यं स्वरचितकाव्यप्रस्तुतिपुरःसरं प्रस्तुतम्, तत्र पर्यावरणं प्रति जागरुकाभावे काः काः समस्याः अस्माकं समाजे आपतिताः इति सङ्केतितम्। डा.अनिलकुमारेण पर्यावरणचेतना कथमावश्यकी, इत्यस्मिन् विषये कथं सूचना प्रदातव्या इत्येवं स्वविचाराः समुपस्थापिताः। डा.सच्चिदानन्दस्नेहीमहोदयेन पर्यावरणस्य कोऽर्थः, तस्य सुरक्षार्थं के के उपायाः भवन्तीत्येवम्भूताः स्वविचाराः प्रकटिताः। तस्मिन् सन्दर्भे एकं काव्यमपि तेन प्रस्तुतम्। सङ्गोष्ठ्या अध्यक्षरूपेण विराजमानेन परिसरनिदेशकेन प्रो.बनमालीबिश्वालमहोदयेन पर्यावरणस्य प्राचीनं स्वरूपं कीदृशमासीत्, कथं तस्य वर्णनं संस्कृतकाव्येषु विद्यते, आधुनिकसमाजे समागतानां समस्यानां समाधानाय पर्यावरणसुरक्षा कथम् आवश्यकी इति विस्तरेण प्रतिपादितम्। स्वकीये चाध्यक्षीयोद्बोधने महोदयेन पर्यावरणचेतनाया आशयं स्पष्टीकृत्य सांस्कृतिक-प्राकृतिकप्रदूषणं कथं निराकर्त्तव्यमिति सोदाहरणं प्रस्तुतम्। अन्ते च तेन उत्तराखण्ड-प्राकृतिकपर्यावरणप्रसङ्गे स्वकेदारायणमित्यस्मात् खण्डकाव्यात् पद्यानि उदाहृतानि। कार्यक्रमस्यान्ते डा.अवधेशबिजल्वाणमहोदयेन सर्वेषां समागतानां धन्यवादः कृतः। अस्याः सङ्गोष्ठ्याः तकनीकीसञ्चालनं व्याकरणविभागस्य प्राध्यापकेन डा.श्रीओमशर्मणा, सङ्गणकविभागस्य प्राध्यापकेन श्रीपङ्कजकोटियालमहोदयेन च कृतम्। सम्पूर्णकार्यक्रमस्य संयोजनम्, सञ्चालनञ्चात्यन्तव्यवस्थितरूपेण पुस्तकालयाध्यक्षमहोदयेन श्रीनवीनडोबरियालमहोदयेन विहितम्। एवं प्रकारेण श्रीरघुनाथकीर्तिपरिसरे विश्वपर्यावरणदिवसो महता हर्षोल्लासेन समायोजितः।


(अन्तर्जालमाध्यमेन समवेताः सम्मानितजनाः)

## श्रीरघुनाथकीर्तिपरिसरेण योगदिवसे समायोजिता राष्ट्रिया सङ्गोष्ठी


(योगदिवसे सङ्गोष्ठ्याश्चित्रम्)

योगो भवति दुःखहा, समत्वं योग उच्यते, योगश्चित्तवृत्तिनिरोधः, योगः कर्मसु कौशलम् एवम्भूता नैकाः परिभाषात्मिकाः सूक्तयो दृश्यन्ते शास्त्रेषु याभिः स्वस्थशरीरं योगेन सम्भवतीति ज्ञायते। अतः सम्पूर्णविश्वे जूनमासस्य 21 दिनाङ्के योगदिवसो हर्षोल्लासेन परिपाल्यते। तदनुसारेण केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरेऽपि दिवसेऽस्मिन् विविधाः कार्यक्रमाः आयोज्यन्ते। अस्मिन् वर्षेऽपि योगदिवसमुपलक्ष्य अन्तर्जालीयैका राष्ट्रिया सङ्गोष्ठी भारतीयदार्शनिक-अनुसन्धानपरिषदः संयुक्ततत्त्वावधाने समायोजिता, यस्यां मुख्यातिथिरूपेण सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतयः प्रो.हरेरामत्रिपाठिमहोदयाः, मुख्यवक्तृरूपेण काशीहिन्दूविश्वविद्यालयस्य दर्शनधर्मसङ्कायस्य आचार्याः, अपि च आईसीपीआर (नवदेहली) इति संस्थायाः सदस्यसचिवाः प्रो.सच्चिदानन्दमिश्रमहोदयाः, प्रायोगिकयोगप्रशिक्षकत्वेन हिसारयोगशालायाः श्रीमन्तः अनिलपानुमहोदयाः, अतिथिवक्तृरूपेण श्रीरघुनाथकीर्तिपरिसरस्य साहित्यविभागाध्यक्षाः प्रो.विजयपाशास्त्रिमहोदयाः, अध्यक्षत्वेन श्रीरघुनाथकीर्तिपरिसरस्य निदेशकाः प्रो.बनमालीबिश्वालमहोदयाश्चोद्बोधितवन्तः। कार्यक्रमस्यादौ वैदिकमङ्गलाचरणं नवनियुक्तेनातिथिप्राध्यापकेन डा.अमन्दमिश्रेण प्रस्तुतम्। तदनन्तरं समेषामुपस्थितानां स्वागतं कार्यक्रमस्य संयोजकेन श्रीरघुनाथकीर्तिपरिसरस्य न्यायविभागाध्यक्षेण डा.सच्चिदानन्दस्नेहीमहोदयेन कृतम्। ततः परं कार्यक्रमस्य सहसंयोजकेन डा.गौतमकुमारचौधरिणा छात्राणां प्राध्यापकानां च योगासनसम्बद्धानि छायाचित्राणि चलचित्राणि च प्रदर्शितानि। कार्यक्रमे प्रायोगिकयोगप्रशिक्षकत्वेनोपस्थितेन अनिलपानुमहोदयेन योगस्य विभिन्नानि आसनानि प्रस्तुतानि। एतदवसरे तमनुसृत्य समेऽपि कार्यक्रमे संयुक्ताः अतिथयः परिसरीयाः प्राध्यापकाश्छात्रश्च योगाभ्यासं कृतवन्तः। पानुमहोदयेन कस्यासनस्य शरीरे कथं प्रभावो भवतीत्यपि सम्यक्तया निगदितम्। प्रो. हरेरामत्रिपाठिना अभिनवगुप्तस्य कीदृशी दृष्टिः शैवदर्शने विद्यते, कथञ्च शैवदर्शने योगस्य तत्त्वानि निहितानि सन्ति चेत्येतत्सर्वं विस्तरेण प्रतिपादितम्, अपि च दर्शनशास्त्रेषु योगस्य किं स्वरूपमिति सूक्ष्मदृष्ट्या विवेचितम्। प्रो.सच्चिदानन्दमिश्रेण न्याययोगयोः कथं परस्परं सम्बन्धो वर्तते, कथं च सन्निकर्षनिरूपणप्रसङ्गे योगस्य समन्वयः न्यायशास्त्रकारैः कृतः इति यथाशास्त्रमतिगम्भीरतया स्वचिन्तनं प्रस्तुतम्। साहित्यविभागस्याध्यक्षः प्रो.विजयपालशास्त्री गीतायां योगस्य किं स्वरूपम्, कथं तत्र प्रतिपादितेन योगेनाधुनिककाले मानवस्य सर्वेषां शारीरिकमानसिकरोगाणां प्रशमनं भवतीति विस्तरेणोक्तवान्। सिद्ध्यतीति विस्तरेण विवेचितम्। साहित्यविभागस्य प्राध्यापकः डा.अनिलकुमारो योगः जीवनस्याभिन्नाङ्गरूपेण शरीरस्य स्वास्थ्य कथं सम्वर्धयत्येवम्भूतान् स्वविचारान् प्रस्तुतवान् तथा कार्यक्रमे समुपस्थितानां सर्वेषां सपद्यं धन्यवादं कृतवान्।

अन्ते च शान्तिपाठेन कार्यक्रमः समाप्तिं गतः। सम्पूर्णकार्यक्रमस्य सपद्यं कुशलसञ्चालनं वेदविभागाध्यक्षेण डा.शैलेन्द्रप्रसादउनियालमहोदयेन कृतम्। अन्तर्जालमाध्यमेन फैसबुकमध्ये कार्यक्रमस्य साक्षात्प्रसारणं व्याकरणविभागस्य प्राध्यापकेन डा.श्रीओमशर्मणा विहितं तथा चित्र-दृश्यचित्रणां यूट्यूबमाध्यमेन संयोजनं पुस्तकालयाध्यक्षेण श्रीनवीनडोबरियालमहोदयेन कृतम्। एवममन्देनानन्देन योगदिवसमुपपलक्ष्य श्रीरघुनाथकीर्तिपरिसरे समायोजितेयम् अन्तर्जालीया राष्ट्रिया सङ्गोष्ठी।



(डॉ.आर.बालमुरुगनमहोदयस्य सौप्रस्थानिकम्)

## प्राध्यापकानां स्थानान्तरणप्रसङ्गे सौप्रस्थानिकम्



(प्रो.के.बी.सुब्बारायुडुमहोदयस्य सौप्रस्थानिकम्)

केन्द्रीयसंस्कृतविश्वविद्यालयस्य पूर्वतः एव नियमो वर्तते यत्कस्यापि सेवाकर्मिणः सम्पूर्णभारते यत्र यत्र परिसराः सन्ति तत्र कुत्रापि नियुक्तिः, स्थानान्तरणं वा भवितुं शक्नोति। तन्नियमानुसारेणैव श्रीरघुनाथकीर्तिपरिसरस्य पूर्वनिदेशकस्य प्रो.के.बी.सुब्बारायुडुमहोदयस्य स्थानान्तरणं फरवरीमासस्य 11 तमे दिनाङ्के केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीसदाशिवपरिसरे (पुर्याम्, उत्कलप्रदेशे) अभवत्। एवमेव फरवरीमासस्यैव 26 दिनाङ्के न्यायविभागस्य प्राध्यापकस्य डा.आर.बालमुरगनमहोदयस्यापि केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीसदाशिवपरिसरे एव स्थानान्तरणं जातम्।

## नूतनप्राध्यापकानाम् आगमनम्



श्रीरघुनाथकीर्तिपरिसरे अस्मिन् वर्षे अप्रैलमासस्य 19 तमे दिनाङ्के डा.गौतमकुमारचौधरीमहोदयस्य आगमनमभवत्। गौतममहोदस्य उच्चशिक्षा दिल्लीविश्वविद्यालयात्, नवदेहलीतः सम्पन्ना, तदनन्तरं तत्रैव अनेन वर्षद्वयम् अध्यापनं कृतम्। केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरणवीरपरिसरे, जम्मूप्रदेशे 2019 तमे वर्षे सहायकाचार्यत्वेनास्य नियुक्तिः सञ्जाता आसीत्। तत एव तस्य अस्मिन् वर्षे श्रीरघुनाथकीर्तिपरिसरे स्थानान्तरणं जातम्। अधुना सः शारीरिकशिक्षाविषये सहायकाचार्यरूपेण श्रीरघुनाथकीर्तिपरिसरे कार्यं करोति। डॉ. मनीष शर्मा श्रीनिवाससंस्कृतमहाविद्यालयतः पूज्यस्वामिवर्यश्रीनिवासाचार्याणां सन्निधौ



व्याकरणशास्त्रस्य सम्पूर्णां प्रक्रियामधीत्य काशीहिन्दूविश्वविद्यालयतः शास्त्री, आचार्यमधीतमथ च काश्याम् आचार्यश्रीपुरुषोत्तमत्रिपाठिगुरुवर्याणां सन्निधौ कृत्स्नं व्याकरणमपठत्। अयं केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरतः शोधकार्यञ्च कृतवान्। शैक्षणिकानुभवरूपेण अनेन श्रीरामसंस्कृतमहाविद्यालयः चित्रकूटम् (म.प्र.) 01/07/2016 तः 11/11/2019 एवं यावत् व्याकरणविभागे, अपि च छत्तीसगढप्रदेशे छत्तीसगढसंस्कृतशिक्षासेवासंस्थाने शास्त्रपरम्परायाः प्रवर्धनाय अध्यापनाय संरक्षणाय च नैशुल्क्येन व्याकरणशास्त्रं अध्यापितम्। सम्प्रति चायं केन्द्रीयसंस्कृतविश्विद्यालयस्य श्रीरघुनाथकीर्तिपरिसरे व्याकरणविभागे अतिथिप्राध्यापकरूपेण पाठयति। डा.जनार्दनसुवेदी न्यायशास्त्रे प्राध्यापकः समागतः य



आबाल्यकालादेव वाराणस्यामध्ययनं कृत्वा तत्रैव सम्पूर्णानन्दविश्वविद्यालतः षोडशाधिके द्विशहस्रतमे ई. वर्षे (2016) नव्यन्यायविषमधिकृत्य लब्धस्वर्णपदकश्च आचार्यकक्षामुदतरत्। अनेन न्यायशास्त्रस्याध्ययनं सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य प्रतिकूलपतिचराणां श्रीमतां प्रातः स्मरणीयानां प्रो. वशिष्ठत्रिपाठीगुरुचराणानां सकाशे तथा B.H.U. आई.आई. टि.



विभागीयसहायकप्राध्यापकनां विश्वनाथधितालगुरुवर्याणां सकाशे कृतम् । शोधकार्यञ्चास्य केन्द्रीयसंस्कृतविश्वविद्यालयस्य कर्णाटकराज्यस्थात् राजीवगान्धीपरिसराद् श्रीमतां प्रो. का.ई. मधुसूदनवर्याणां मार्गदर्शने प्रचलति। इदानीं केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरस्य न्यायविभागे अतिथिप्राध्यापकपदे कार्यरतोऽस्ति। डॉ.अमन्दमिश्रः बलियाजनपदस्य, उत्तरप्रदेशीयः वर्तते। अस्य पूर्वमध्यमातः उत्तरमध्यमा-पर्यन्तम् उत्तरप्रदेशमाध्यमिकसंस्कृतशिक्षा-परिषदः



अध्ययनं जातम्। राष्ट्रीयसंस्कृतसंस्थानतः शास्त्रिपरीक्षां समुत्तीर्य अनन्तरं सम्पूर्णानन्दसंस्कृतविश्वविद्यालयतः आचार्यमधीत्य तत एव परमपूज्यानां प्रो.महेन्द्रपाण्डेयगुरुवर्याणां कुशलमार्गनिर्देशने विद्यावारिध्युपाधिं लब्धवान्। तदनन्तरं पञ्चवर्षाणि यावत् सम्पूर्णानन्दसंस्कृतविश्वविद्यालये वेदविभागे अध्यापितवान्। सम्प्रति अयं महानुभावः श्रीरघुनाथकीर्तिपरिसरे वेदविभागे अतिथिप्राध्यापकरूपेण कार्यं करोति। डॉ.मधुसूदनपाण्डेयः उत्तरप्रदेशस्य गोरखपुरनगरे लब्धजन्मा, अस्य प्रारम्भिकमध्ययनं श्रीगुरुगोरक्षनाथसंस्कृतोच्चतर- माध्यमिकविद्यालयगोरखनाथमन्दिराद् गोरखपुरतः जातम्। तत्रैव काशीहिन्दूविश्वविद्यालतः सप्तदशाधिक -द्विशहस्रतमे वर्षे (२०१७) गणितज्योतिषविषयमाश्रित्य आचार्यकक्षामुत्तीर्णवान्। अस्य शोधकार्यञ्च काशीहिन्दूविश्वविद्यालयस्य ज्योतिषविभागतः श्रीमतां प्रो. विनयकुमारपाण्डेयवर्याणां मार्गदर्शने अभवत्। सम्प्रति केन्द्रीयसंस्कृतविश्वविद्यालयस्यैव श्रीरघुनाथकीर्तिपरिसरे ज्योतिषविषयस्यातिथ्यध्यापकपदे कार्यरतोऽस्ति।

## आषाढे प्रथमे दिने

प्रो.बनमाली बिश्वाल:

### (1) कोरोणादूतम्

सुदूरे नगरे स्थित्वा कोरोणाकारणात्प्रियः।
प्रियां स्मरति सोत्कण्ठमाषाढे प्रथमे दिने ।1।

कं वा दूतं करिष्येऽहं न मेघाः गगने यतः।
दूतीकरोमि कोरोणामाषाढे प्रथमे दिने ।2।

कोरोणायास्तु भूताणोर्मेघाद् द्रुततरा गतिः।
कर्तव्यं तस्य दूतत्वमाषाढे प्रथमे दिने ।3।

प्रियायै याहि कोरोणे! सन्देशं नु प्रयच्छ मे।
नैव करोतु तत्स्पर्शमाषाढे प्रथमे दिने ।4।

यतो जाने तव स्पर्शात् कियन्तोऽत्र दिवंगताः।
मुमूर्षवोऽपरे केचिदाषाढे प्रथमे दिने ।5।

एवमेव कियन्तोऽत्र सन्ति चाद्य तवाधीनाः।
सन्ति मृत्यु-प्रतीक्षायामाषाढे प्रथमे दिने ।6।

प्रक्षाल्य स्वकरौ सम्यग् धारयित्वा च वर्णिकाम्।
ततः प्रयच्छ सन्देशनाषाढे प्रथमे दिने ।7।

परिचयो न दातव्यो भीता त्वत्तो भवेद् यतः।
दातव्या मम सन्देशाश्चाषाढे प्रथमे दिने ।8।

मुखावरणसंयुक्ता तिष्ठत्यनुक्षणञ्च सा।
अभिज्ञानञ्च कर्तव्यं सुविचार्य त्वया पुनः ।9।

अन्यथा क्वचिदन्यस्यै यदि वार्तां प्रदास्यसि।
तर्हि त्वं लप्स्यसे दण्डमाषाढे प्रथमे दिने ।10।

प्रतिगृह्य ततो वार्तां प्रत्यावर्तस्व सत्वरम्।
वर्तिष्येऽहं प्रतीक्षायामाषाढे प्रथमे दिने ।11।

करिष्यसि विलम्बं चेत् त्वं प्रत्यावर्तने पुनः।
द्रक्ष्यसि मां मृतं नूनमाषाढे प्रशमे दिने ।12।

### (2) दारिद्य-प्रसङ्गे

आकाशे च मेघं दृष्ट्वा दरिद्रश्च सशङ्कितः।
आत्मरक्षा कथं मेघादाषाढे प्रथमे दिने ।1।

जलं गलति सर्वत्र गृहेऽलिन्देऽङ्गने पुनः
कथं वारयितुं शक्यमाषाढे प्रथमे दिने ।2।

जीर्णं छत्रं गृहे चैकं वर्षातप-नियन्त्रकम्।
छेदः कार्यं कथं कुर्यादाषाढे प्रथमे दिने ।3।

भग्नं पात्रद्वयं यस्य पाककार्याय सम्बलम्।
भूमेः रक्षा कथं ताभ्यामाषाढे प्रथमे दिने ।4।

एकवस्त्रा च तत्पत्नी स्नानादीनां प्रसङ्गतः।
तस्याश्चार्द्रात् सुरक्षा स्यादाषाढे प्रथमे दिने ।5।

ज्वाराक्रान्ता च तत्पुत्री कम्पते चौषधं विना।
तस्याः मेघात् सुरक्षा स्यादाषाढे प्रथमे दिने ।6।

लब्धञ्च परिधानं यत्पुत्रो विद्यालयात् पुनः।
मेघेनार्द्रं क्वचिन्न स्यादाषाढे प्रथमे दिने ।7।

अकस्मादतिमेघाद्वा कर्तुञ्च शस्यरक्षणम्।
चिन्तितः कृषिजीव्यस्ति ह्याषाढे प्रथमे दिने ।8।

आषाढश्च कथं शान्तो भवेदिति विचिन्तयन्।
शपति भृशमाषाढमाषाढे प्रथमे दिने ।9।

आषाढान्तप्रतीक्षायां गणयति दिनानि वै।
लब्धुञ्च परमानन्दमाषाढे प्रशमे दिने ।10।

### (3) धनिकानां प्रसङ्गे

सुखदं घर्मशान्त्या च भोगगविलास-साधनम्।
धनिकानां महान् हर्षश्चाषाढे प्रथमे दिने ।1।

मेघकणाः गवाक्षेन शय्यागताः गृहे यतः।
वर्षासुखं गृहे साक्षादाषाढे प्रथमे दिने ।2।

प्रियासमागमो रम्यो वर्षाकाले भवेत् पुनः।
रतिस्सुखकरी नूनमाषाढे प्रथमे दिने ।3।

वर्षाभिर्दुर्दिने मुक्तिः स्वतः कार्याच्च लभ्यते।
कालोऽयं सुखदो ह्यश्चाषाढे प्रथमे दिने ।4।

वर्षाकाले गते तेषां सुखे हानिर्भवेद् यतः।।
चित्तं दुःखाकुलं तेषामाषाढे प्रशमे दिने ।5।

## आषाढस्य प्रथमदिवसे

प्रो.बनमाली बिश्वाल:

न जानेऽहं केन कदा कथमभिशप्तः
न जानेऽपि शापकालः कियान्मे व्यतीतः
असह्यान्मे विरहव्यथातः
अवतारो गृहीतोऽस्ति कश्चिद्
अभिनवः रामगिरि-यक्षः।
विरहस्य न मे कश्चिदन्तः
दिवानिशं वक्षोदेशः
विरहाश्रु-सिक्तः,
गोपायामि दुर्बलतां स्वकां
लोकादस्माद् अहमस्मि भीतः,
अवलोक्य मदीयां दुर्दशां
परिहसिष्यति क्वचित् लोकः।
न जाने कोऽभिशापकः
न कुवेरः
किन्तु भवेत् कश्चिन् महाकालः,
न जानेऽपि शापावधिः
कियांश्च व्यतीतः,
कियान् अवशिष्टः।

कालिदास-यक्षस्य तु
अष्टौ मासाः कथञ्चिद् व्यतीताः
किन्तु हन्त प्रतिक्षणं
मम प्राणाः भवन्ति सन्तप्ताः
वर्षर्तौ च विशेषतः विरहिणो मम
शतगुणं विबर्द्धन्ते व्यथाः।
आषाढस्य प्रथमदिवसे
प्रियायै यक्षिण्यै पुरा
यक्षेनैव प्रेषितः सन्देशः,
मेघोऽभवत् स्वाभाविकः
तद्वार्ता-वाहकः।
न जानेऽहं कांस्कान् ऋतून
यापयिष्ये त्वद्विरहे प्रिये!
मदर्थं हे प्रियतमे!
सर्वर्तुश्च भात्यत्र वर्षर्तुः
सर्वो मासोऽप्याषाढोऽस्ति पुनः
प्रतिदिनमाषाढस्य प्रथमदिवसः
यदा-कदा त्वत्स्मरणे प्रिये !
वैशाखेऽपि श्रृणोम्यहम्
आषाढीयं स्तनितगर्जनम्।

## भारतवैभवम्

डॉ. शैलेन्द्रप्रसादउनियालः

कवीनां नवीनः प्रवीणः सुधीनाम्,
समेषां विचारो भवेद्राष्ट्रहारः।
हिरण्यं यथा सत्सदा सङ्क्रमेन्नृन्,
तथा-गद्य-काव्यानि वाच्यानि सारः।।
युगोऽयं कलिश्चापि दोषा गम्भीराः,
सुवीरा भवन्त्यत्र भक्त्या सुधीराः।
सहन्तः कुपीडां वहन्तः स्वधर्म्मान्,
अतो व्यास-भासादिमहान्तः कवीराः।।2।।
मदीया नदीयं वहेद्राष्ट्रभक्तिं,
प्रदद्यात्स्वयं श्रीं शिवः केशवो वा।
ऋषीणामियं भूः कवीनाञ्च देशः,
सदा क्लिष्टविद्याधराणां विशेषः।।3।।
प्रधीनां गणानां भवेच्छासनं यत्,
महत्तज्जनानां भवेत्सौहृदन्नः
प्रजाश्चापि तथ्यं तु सत्यान्वितार्थं,
प्रदद्युर्मतं स्वं स्वराष्ट्रैक्य-हेतोः।।4।।
सुसेनाः सुषेणाश्च सन्तीह कन्याः,
जनाश्चापि धन्याः स्वसेवाविधानात्।
सुवैज्ञानिकाश्चाभियान्त्रीषु रक्ताः,
विरक्तासु विद्यासु युक्ता भवन्तः।।5।।
स्वराष्ट्रं मदीयं विदेशेषु मान्यं,
कुटुम्बे भवेच्छान्तियुक्तं सुधान्यम्।
गदारातिदं यत् सुकाव्यं च नित्यं,
धरन्तीह धातून्धरायां विचित्रान्।।6।।
फलं वैदिकायाः कृतेः सर्वमेतद्भवेच्चापि,
सिद्धिः सतां सर्वदा सा।
प्रभावः स्वभावस्तथा चानुभावः,
विभातीव रात्रौ शशाकोडुराजः।।7।।
वयं भारतीया अतीतं स्मरामः,
व्यतीयाय भव्यं दिव्यं सन्धरामः।
स्वलक्ष्यं सुधा तत्त्वमाप्तुं प्रयासः,
विदेशाच्च धावन्ति योगं ग्रहीतुम्।।8।।

## भारतभूतले

डॉ. अनिलकुमारः

राजते उत्तरस्यां नगाधिराजः,
दक्षिणे विलसति हिन्दमहासागरः,
विविधाभिर्भाषाभिर्वेषैश्च जनाः,
संस्कृतिं तन्वन्ति भारतभूतले।।1।।
धर्मा यद्यप्यत्र सन्ति विभिन्नाः,
परञ्चोपदेशमेकमेवोपदिशन्ति,
मानवस्य सेवाधर्मः परमगहनम्,
गीतायामपि गीतो भारतभूतले।।2।।
विदुषामत्र भवति नित्यं निवासः,
गङ्गासरिद्यत्र पावना च वहति,
युद्धेऽपि धर्मं शास्त्यत्र नो देवः,
सनातनो यो भाति भारतभूतले।।3।।
पूज्यन्ते नार्या हि दुर्गोत्सवे यत्र,
वादेषु संवादा इव शास्त्रसाराः,
सुशोभन्ते ते सभासु च सभ्याः,
गीयन्ते येषां कीर्तिर्भारतभूतले।।4।।

## मशकस्य व्यवहारः

डॉ. अनिलकुमारः

कदाचिद् दिवसे,
कदाचिच्च रात्रौ,
कदाचिज्जागरणे,
कदाचिच्च सुषुप्तौ,
सूचयति पूर्वम्,

स्वागमनस्य कालम्
तदा ज्ञायते मशकस्य व्यवहारः।
ध्वनिना सङ्केतयति
मानवस्य जागर्तिम्,
निद्रायामपि भवति
किमर्थमावश्यकी,
न शयनस्य कालोऽयम्
कस्यापि विजितेन्द्रियस्य
बोधयति तदा मशकस्य व्यवहारः।
दशति न तथा कदापि
यथा मानवाः परस्परम्,
वसति स्वसमाजे,
प्रेरयन् बन्धुभावम्,
कीदृशो नो व्यवहारः,
मशकादपि भयङ्करः,
चिन्तनीयस्तदा मशकस्य व्यवहारः।
न प्रविशति मशकजालम्,
न तिष्ठति मृत्योर्गन्धे,
जानाति स्वात्मरक्षाम्,
स्वप्राणमोहं परित्यज्य
निहन्ति मनोवाक्कर्मभिः
किमर्थं तदा मानवः,
नैवायं भवति मशकस्य व्यवहारः।

## धर्मः

डॉ. अनिलकुमारः

मानवस्य को धर्मः?
किं रक्षणम्?
कस्य, कस्माच्च?
धर्मस्य चेत्
अधर्माच्च?
अद्यापि धर्मोऽधर्म एव
चित्ते गुणानां
यदि नो निवासः,
स एव धर्मः,
न दृश्यतेऽत्र
तादृश्यवस्था
हिंसैवाधर्मश्चेत्
वैदिकहिंसायाः
विद्यते को धर्मः।
सर्वत्रैव सहृदयता
प्रमाणम्
धर्मेऽपि भवति
तथैवाधर्मे।।

## सायमुपैति (शिशुकाव्यम्)

श्रीदेवस्मितदे

पश्य,
नगरात् ग्राममायाति सायम्
सूचयति चित्रं भावविकारम्।
याति कर्षकः आवालमालम्ब्य
ध्वस्तः स्रस्तगवादिसङ्गः।
गात्रमार्जः शोभयति रिक्तकायम्
स्कन्धे लाङ्गल-मृत्कर्षणम्।
भास्करः सम्प्रति अस्तं याति
शाकाय वृद्धा सरसमेति।
'टिम-टिमिति' दीपं तुलसीतले
व्यस्ताः शिशवः कथापठने।
स्थितः पण्डितः करधृतवेत्रः
पठति च पाठ्यं भयार्त्रनेत्रः।
घन्टानादेन मुखरितमन्दिरम्
श्वानः स्पर्धन्ते रवेण शङ्खम्।
अमनोयोगी एकाकी वालः
वातायने वर्तिकां प्रज्वाल्य,
'चरकिणा' क्रीडति पुस्तकपृष्ठे
आयाति मातेत्यन्तर्धत्ते।
अधुना तारका आयाति आकाशे
विल्वेन युथिका प्रकाशते।
राजते चन्द्रः शुभ्रमेघाञ्चले
शेते शिशुः मात्रञ्चलतले।



साक्षात्कारः

# केन्द्रीयसंस्कृतविश्वविद्यालयस्य
## श्रीरघुनाथकीर्तिपरिसरस्य

नव-निदेशकैः

**आचार्यैः बनमालीबिश्वालमहोदयैः**

सह

**सारस्वतः संवादः**

* डा. अनिलकुमारःअन्ये च सहकर्मिणः

संस्कृतजगति अभवन् भवन्ति भविष्यन्ति च वाग्देव्याः समुपासकाः, येषां लेखन्या समर्चिता भवति सा देवी। आधुनिकरचनाकारेषु सन्ति केचन द्वित्रा पञ्चषा वा रचनाकारा येषां काव्यकृतयः सर्वेषु विषयेषु सर्वासु च काव्यविधासु प्रथिता भवन्ति। तादृशा एवाद्य अस्माकं मध्ये विद्यन्ते उत्तराखण्डस्य देवप्रयागस्थस्य च केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरस्य नव-नियुक्ता निदेशकाः प्रो. बनमालीबिश्वालमहोदयाः, येषां कीर्तिः संस्कृतजगति संस्कृतज्ञानां हृदये नित्यं विलसति। एते महोदयाः जनवरीमास्स्य अष्टादशदिनाङ्के श्रीरघुनाथकीर्तिपरिसरस्य निदेशकत्वेन कार्यभारं गृहीतवन्तः। तदवसरे मया परिसरीय-सहकर्मिभिः सह मिलित्वा तैस्सह काचित् सारस्वत-वार्ता कृता। तैस्सह सञ्जातस्य साक्षात्कारस्य केचन अंशा अत्र रघुनाथ-वार्तावल्याः पाठकानां मोदाय प्रस्तूयन्ते -

✍ **भवन्तः सर्वादौ स्वजन्मतीर्थविषये तथा शिक्षादीक्षा-तीर्थादिविषये सूचयन्तु ?**

☞ पितुः श्रीनारायण-बिश्वालस्य तथा मातुः श्रीमत्याः सत्यभामा-देव्याश्चतुर्थपुत्ररूपेण 1961 तमे ईस्वीये संवत्सरे उत्कलप्रदेशस्य याजपुरमण्डले तेलिआ-ग्रामे लब्धजन्माऽहमादौ स्वग्रामे तथा स्वग्राम-निकटस्थे हाटसाहिविद्यालये प्रारम्भिकीं शिक्षां सम्प्राप्य हाटसाहिस्थ-दधिवामनसंस्कृत-विद्यालयात् प्रथमा-परीक्षामुत्तीर्य श्रीक्षेत्रं पुरीं गतवान्। तत्र चादौ स्वर्गद्वारस्थे श्रीवेदकर्मकाण्ड-महाविद्यालये मध्यमा-परीक्षामुत्तीर्य तत्रैव पुर्यां राष्ट्रिय-संस्कृत-संस्थानस्य (इदानीन्तनस्य केन्द्रीय-संस्कृत-विश्वविद्यालयस्य) श्रीसदाशिव-केन्द्रीय-संस्कृत-विद्यापीठे (इदानीन्तने श्रीसदाशिवपरिसरे) शास्त्री-परीक्षामुत्तीर्य तथा श्रीजगन्नाथ-संस्कृत-विश्वविद्यालयाद् आचार्य-परीक्षामुत्तीर्य उच्चशिक्षार्थं पुण्यपत्तनं (पूनाम् इदानीन्तनं पुणेनगरं) गतवान्। तत्र च पुणे-विश्वविद्यालये (इदानीन्तने साबित्रीबाई फुले पुणे-विश्वविद्यालये) एम.ए., एम.फील. तथा पीएच.डीं कृतवान्।

✍ **के के भवतां प्रमुखा गुरवः आसन् यान् अधुनाऽपि भवन्तः स्मरन्ति ?**

☞ आचार्याः पण्डित-कुलमणिमिश्रमहोदयाः दधिवामनसंस्कृत-विद्यालयस्य, आचार्याः श्रीमन्तः जगदानन्ददाश-महोदयाः श्रीवेदकर्मकाण्ड-महाविद्यालयस्य, आचार्याः डा. त्रिलोचनमिश्रमहोदयाः श्रीसदाशिव-केन्द्रीय-संस्कृत-महाविद्यालयस्य, आचार्याः प्रो. शिवरामदत्तात्रेयजोशी-महोदयाः, आचार्याः-प्रो. सरोजाभाटेमहोदयाः (मम शोधमार्गदर्शिकाः) तथा पुणे-विश्वविद्यालयस्य अन्ये च समे आचार्याः-प्रो.एस.डी. लड्डु-महोदयाः-प्रो. एम. डी. पण्डित महोदयाः, प्रो. एस.के.लाल- महोदयाः, प्रो. वी.एन. झा- महोदयाः, प्रो. एस.के.शाह- महोदयाः, प्रो. जी.यू.थिटे- महोदयाः तथा प्रो. इन्दुलता देशपाण्डे-महोदयाश्च मे स्मृतिपथमायान्ति।

✍ **भवताम् अध्यापनपरम्परा कुत आरब्धा? संस्कृत-जगति प्राध्यापकरूपेण कदा सेवा प्रारब्धा? अस्मिन् परिसरे च कदा आगमनमभवत् ?**

☞ राष्ट्रिय-संस्कृत-संस्थानस्य (इदानीन्तनस्य केन्द्रीय-संस्कृत-विश्वविद्यालयस्य) प्रयागस्थे श्रीगङ्गानाथ-झा-केन्द्रीय-संस्कृत--विद्यापीठे (प्राक्तने श्रीगङ्गानाथ-झा-शोधसंस्थाने, इदानीन्तने गङ्गानाथ-झा-परिसरे) 1988 तमे ईस्वीये संवत्सरे (18.04.1988 तमे दिनाङ्के) प्रवक्तृपदे (इदानीन्तने सहायक-आचार्यपदे) स्वकीयमध्यापनमारब्धवान्। तत्र 2016 ईस्वीयं संवत्सरं यावद् आदौ प्रवक्तृरूपेण, ततः प्रवाचकरूपेण (इदानीन्तन-सहाचार्यरूपेण) ततश्च आचार्यरूपेण व्याकरण-विभागाध्यक्षरूपेण च सेवां कृत्वा ततश्च 2016 तमे ईस्वीये संवत्सरे स्थानान्तरितो भूत्वा नूतनतया समुद्घाटिते उत्तराखण्डस्य देवप्रयागस्थे केन्द्रीय-संस्कृत-विश्वविद्यालयस्य श्रीरघुनाथकीर्ति-

-परिसरे 17.06.2016 तमे दिनाङ्के आचार्यरूपेण तथा व्याकरणविभागाध्यक्षरूपेण च कार्यभारं गृहीतवान्। पञ्चवर्षानन्तरं 18.01.2021 तमे दिनाङ्के परिसरेऽस्मिन् निदेशकरूपेण कार्यभारं गृहीतवान्।

**✍ निदेशकपदे यदा समलङ्कृताः तदा काः काः समस्याः भवतां समक्षम् आसन्? तासां समाधानञ्च भवता कथं कृतं क्रियते वा ?**

☞ यथा भवन्तः जानन्ति देवप्रयागस्थस्य केन्द्रीय-संस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरस्य शुभोद्घाटनं 16.06.2016 तमे दिनाङ्के जातम्। अहं तस्मिन्नेव दिने कार्यभारं ग्रहीतुमागतवान्। किन्तु विमानीय-विलम्बकारणात् अपराह्ने ऋषिकेशं यावत् प्राप्तवान्। पर्वतीयक्षेत्रेण अपरचितोऽहं तद्दिने तत्रैवोषित्वा एकदिनानन्तरं 17.06.2016 तमे दिनाङ्के परिसरे कार्यभारं गृहीतवान्। एवमहं परिसरस्य सर्वविध-गतिविधिभिः प्रारम्भादेव पूर्णपरिचितोऽस्मि तथा चात्रत्याभिः समस्याभिरपि परिचितोऽस्मि।

परिसरस्य शुभारम्भाद् द्वितीयवर्षादारभ्य परिसरीय-शैक्षिक-प्राशासनिक-आवासीय-भवनानां निर्माणकार्यमारब्धमासीत्। परन्तु चतुर्थवर्षस्य मध्यभागे (मार्च 2020 तः) क्वचित् कोरोनाकारणात् तथा च क्वचिद् अर्थाभाव-कारणाच्च परिसीय-विविध-भवनानां निर्माणकार्यं प्रायः एकवर्षात् किञ्चिदधिकं कालं यावदवरुद्धमासीत्। मम कार्यभारग्रहणात् परं स्थानदेवस्य श्रीरघुनाथस्य असीम-कृपावशात् फरवरी-मासे केन्द्रीय-विश्वविद्यालयस्य मुख्यालयीय-निर्माण-विभागीयसमित्यानुकुल्येन परिसरीय-निर्माण-कार्याणां भौतिकं निरीक्षणं जातम्। तत्पश्चात् नवदेहल्यां कार्यकारिण्याः समितेरुपवेशनानन्तरं मार्च-मासान्ते कार्यवाहक-संस्थायै लोकनिर्माण-विभागाय मुख्यालयेन धनराशिः प्रदत्तः। ततश्च सम्बद्धो विभागः निर्माण-कार्यस्य पुनरारम्भाय सहमतः अभवत्। वस्तुतः 01 मई 2021 तः निर्माण-कार्यस्य पुनरारम्भः सुनिश्चित आसीत्। परन्तु कोरोनाया द्वितीय-लहर-कारणात् तदानीं तन्न जातम्। अन्ततो गत्वा विघ्ननिवारणाय गणपत्यादि-देवानां पूजार्चनानन्तरमिदानीं जुलाई-मासात् निर्माण-कार्यं पुनरारब्धम्। प्राशासनिक-शैक्षिक-आवासीय-भवनानाम् अवशिष्टं निर्माण-कार्यमिदानीं प्रगति-पथे अग्रे सरति। यदि सर्वं योजनाननुसारं प्रचलिष्यति तर्हि केषुचिन्मासेषु, प्रायः जनवरीमासं यावत् निर्माण -कार्यं पूर्णतां यास्यति।

एवमयं परिसरः स्ववाल्यावस्थायामेव वर्तते। बालानां प्रसङ्गे चाणक्येनोक्तं - लालयेत् पञ्च वर्षाणि दश वर्षाणि ताडयेत्। अनेन न्यायेन परिसर-रूपी चायं बालकः प्रथमेषु पञ्चवर्षेषु यथासम्भवमस्माभिर्लालितः पालितश्च। किन्तु अग्रिमेषु दश-वर्षेषु चैतस्य संवर्धनाय तथा विकासाय अनुशासनमपि अपेक्ष्यते। अतः मया इदानीम् अनुशासनोपरि बलं दीयते। नियमपूर्वकं सर्वविधं कार्यं सम्पादयितुमेका पद्धतिः निर्मातव्या। वस्तुतः अनुशासनं तादृशमपेक्ष्यते यत्र शासनस्य आवश्यकता न भवेत्। यः कश्चन यस्मिन् कस्मिन्नपि दायित्वे वर्तते तत्र सः स्वयमनुशासितो भवति चेद् अनुशासनस्य आवश्यकतैव नास्ति। मन्ये एतदेव आत्मानुशासनमुच्यते। वस्तुतः आत्मानुशासनोपरि बलं दातुमिच्छामि। यदि वयं सर्वे व्यवस्थिता भवेमस्तर्हि व्यवस्था-निर्माणस्यावश्यकतैव नास्ति।

यदा मया कार्यभारो गृहीतस्तदा स्वागतकार्यक्रमे मयोक्तमासीत् परिसरस्य एतानि निर्मितानि निर्माणाधीनानि च भवनानि परिसरस्य शरीरमस्ति। एतस्य आत्मा तु शैक्षिका गतिविधयस्सन्ति। अतः अस्माभिः शैक्षिक-गतिविधिभ्यो समुचिता गतिर्दातव्या वर्तते।

यद्यपि अस्माकं परिसरः स्वकीय-वाल्यावस्थायां वर्तते तथापि अत्र नैकासां पत्र-पत्रिकाणां नियमितं प्रकाशनं भवति। रघुनाथवार्तावली तथा रघुनाथकीर्तिपताका च प्रकाश्येते। देवभूमिसौरभं संस्कृतगङ्गा च प्रस्ताविते वर्तेते। शाब्दीत्रिपथगा-साहिती- दैवी-आम्नायहैमवती-आन्वीक्षिकी- आधुनिकशोधत्रिवेणी-प्रभृतीनां विभागीय-पत्रिकाणामपि नियमितं प्रकाशनं भवति। किन्तु कोरोनाकाले तासां प्रकाशनाय आर्थिक-संसाधनमवरुद्धमस्ति। एतस्याः समस्याया अपि समाधानमस्माभिरन्विष्टम्। यावदेतदर्थमार्थिकसंसाधनं नोपलभ्यते तावत् तासां पत्रिकाणाम् ई-प्रकाशनं करिष्यते इति निर्णयो गृहीतः। अस्मिन् वर्षे रघुनाथवार्तावल्या नैकेषामङ्कानाम् ई-प्रकाशनं जातम्। अन्यासामपि पत्रिकाणां तदर्थं सज्जता क्रियते। अपरञ्च एतासां पत्रिकाणां कृते आई-एस-एस.एन संख्या नोपलब्धा । आई-एस-बी.एन संख्यया तासां प्रकाशनं जायमानमस्ति। तदर्थं मया सहकर्मिणां सहयोगेन कश्चन प्रयासः कृतः। प्रक्रिया इदानीं चलति। शीघ्रमेव समासां पत्रिकाणां कृते आई-एस-एस.एन संख्या उपलप्स्यन्ते।

**✍ अस्मिन् कोरोनाकाले छात्राणामभिवृद्धये के के उपायाः मुख्यतया प्रभावशालिनः सन्ति तेषाम् अनुकरणं कथमत्र कृतमथवा क्रियते च?**

☞ यथा सम्पूर्णे विश्वे विशिष्य भारतवर्षे अन्तर्जालीयं शिक्षणं प्रचलदस्ति तदस्माभिरपि अङगीकृतं अङगीक्रियते च। यदा कोरोनाया स्थितिः काचित् नियन्त्रिता अभवत् तदा अन्तर्जालीय-(अनलाईन) शिक्षणेन सममस्माभिः प्रत्यक्ष शिक्षणं (आफलाइन) अपि आरब्धमासीत्। एवमस्माभिर्मिश्रित-शिक्षणस्य प्रयोगः अपि कृतः द्वित्रेषु मासेषु। तदानीं नैके छात्राः परिसरे समुपस्थिता अभवन्।

परन्तु पुनः कोरोनाया द्वितीय-लहर-कारणादिदानीं परिसरे पूर्णरूपेण अनलाईन-शिक्षणमेव प्रचाल्यते। छात्राणां प्रवेशः अधिकाधिकसंख्यया यथा भवेत् तदर्थं योजनाः निर्मिताः। ग्रामेषु गत्वा ग्रामप्रमुखैः ग्रामजनैश्च मिलित्वा, विद्यालयस्य तथा महाविद्यालयस्य प्राधानाचार्यैः तथा शिक्षकैश्च मिलित्वा संस्कृतं पठितुं छात्रान् प्रेरयामः। खण्डशिक्षाधिकारीणः जिलाशिक्षाधिकारिणश्च पत्रं लिखित्वा विद्यालयान् निर्देशितुं प्रार्थयामः।

छात्राणां विशिष्य शोधछात्राणामुपकाराय प्रतिवर्षमिव अस्मिन् वर्षे अपि परिसरे विभागीयान्ताराष्ट्रिय-राष्ट्रिय-संगोष्ठीनामायोजनं कृतम्। किन्तु ताश्च सर्वाः सङ्गोष्ठयः अन्तर्जालीयाः समभवन्। विगत-षण्मासेषु अस्माभिः विंशत्यधिका सङ्गोष्ठयस्समायोजिताः। ताश्च सङ्गोष्ठयो ज्योतिषे, व्याकरणे, वेदे, साहित्ये, दर्शने, आधुनिक-संस्कृत- साहित्ये, पाण्डुलिपिविज्ञाने, बौद्ध-साहित्ये, -पर्यावरणविषये, योगविषये, मातृभाषाविषये, संस्कृतमूलक-आधुनिकविद्या-विषये विविधविभागीय-प्रयासेन समायोजिताः। समये समये अन्तर्जालीया अखिलभारतीया बहुभाषीया कविगोष्ठयः अपि समायोजिताः। परिसरस्य पञ्चाब्दपूर्तिमुपलक्ष्य 13-15 जुलाई 2021 यावत् त्रिदिवसीया अन्ताराष्ट्रिया अन्तर्जालीया संगोष्ठी च समायोजिता। संगोष्ठ्याः केन्द्रीयविषय आसीत् - उत्तराखण्डविद्यावैभवम्। तदवसरे नैकाश्शोधयोजना अपि परिकल्पिताः।

✍ **भविष्यत्काले का योजना भवतां मनसि विद्यन्ते या अनुसृत्य परिसरोऽयं सर्वेषु परिसरेषु प्रथम-परिसररूपेण समागच्छेत् ?**

☞ अस्माकं प्रयासेन परिसरे द्वित्राणि विशिष्टानि अनुसन्धान-केन्द्राणि समुद्घाटितानि। तानि च सन्ति-आधुनिक-संस्कृत- साहित्य-संसाधनकेन्द्रम् (ReSource Centre for Modern SanSkrit literature) यस्य विधिवदुद्घाटनं भारत-सर्वकारस्य मानवसंसाधन-विकासमन्त्रालयस्य उच्चशिक्षा-राज्यमन्त्रिणः माननीय-सत्यपाल-सिंहस्य करकमलाभ्यां सम्पन्नमासीत्। वस्तुतः वर्तमानसमये भारतवर्षे नैकमपि पुस्तकालयं वर्तते यत्र आधुनिकस्य समकालिकस्य वा संस्कृतसाहित्यस्य विविध-विधोपविधानां रचनानां सामग्रिकं संकलनं समुपलभ्यते। अत एव मत्परामर्शेण मत्प्रयासेन च अस्य केन्द्रस्य स्थापना कृता आसीत्। परिसरस्य पुस्तकालये आधुनिक-संस्कृत-साहित्यस्य एको विशेषविभागः प्रतिष्ठितः येन न केवलमुत्तराखण्डे किन्तु सम्पूर्ण-भारतवर्षे आधुनिक-संस्कृतसाहित्यमधिकृत्य शोधं कुर्वाणाः शोधार्थिनः तथा अन्ये च विद्वांसः अस्य उपयोगं कृत्वा लाभान्विता भवेयुः। अत एव गणमान्याः कवयः, सम्पादकाः प्रकाशकाः तथा विद्वांसश्च अस्माभिः प्रार्थिताः यत् ते स्व स्व-रचनाः उपहार-रूपेण एतत् केन्द्रं प्रेषयन्तु इति। अस्य केन्द्रस्य तत्त्वावधाने परिसराद् आधुनिक-संस्कृत-साहित्य-ग्रन्थमालायाः (Modern SanSkrit Literature SerieS) प्रकाशनं तथा आधुनिक-संस्कृत-साहित्यस्य विवरणात्मिकाया सन्दर्भ-ग्रन्थसूच्याः (DeScriptive Catalogue of Modern SanSkrit Literature) निर्माणं वृहत्तम-परियोजना-रूपेण प्रस्तावितम्। एवमेव समये समये अस्य केन्द्रस्य आनुकुल्येन सम्बद्ध-विषयानधिकृत्य राष्ट्रियान्ताराष्ट्रिय-सङ्गोष्ठीनां कार्यशालानामायोजनं भवेत्। आरम्भिक-स्तरे ऐषमः 14-05-2021 तमे दिनाङ्के बालसाहित्यमधिकृत्य एका अन्तर्जालीया राष्ट्रिया संगोष्ठी समायोजिता। अन्येषु अवसरेषु आधुनिक-संस्कृत-साहित्यस्य अन्य-विषयानधिकृत्य राष्ट्रिया संगोष्ठयः कार्यशालाश्च समायोक्ष्यन्ते। आगामिनि काले कविशिक्षा-अनुवादप्रविध्यादिविषयेषु कार्यशालाः अपि सङ्कल्पिता वर्तन्ते।

एवमेव अस्मिन् परिसरे अस्माकं प्रयासेन चैकं पाण्डुलिपि-संरक्षणानुसन्धानकेन्द्रम् (The Centre for ManuScript preServation and ReSearch) समुद्घाटितं यस्यानुकुल्येन ऐषमः 15-05-2021 तमे दिनाङ्के हस्तलेखसम्पादनविधि-विषयिणी एका अन्तर्जालीया राष्ट्रिया संगोष्ठी समायोजिता। अग्रे च एतत्केन्द्रानुकुल्येन पाण्डुलिपि-विज्ञान-सम्बद्धाः राष्ट्रिया संगोष्ठयः कार्यशालाश्च समायोक्ष्यन्ते।

अपरञ्च अस्माकं परिसरे पूर्वमेव बौद्ध-साहित्य-संसाधनकेन्द्रम् (The ReSource Centre for BuddhiSt SanSkrit literature) डा. प्रफुल्ल-गडपाल-महोदयानां संयोजकत्वे उद्घाटितमासीत्। तेषां स्थानान्तरणानन्तरमपि तस्य केन्द्रस्य सञ्चालनं परिसरेऽस्मिन् करिष्यते इति निर्णयोऽस्माभिः गृहीतः। तदानुकुल्येन ऐषमः 22-07-2021 तमे दिनाङ्के बौद्धसाहित्ये ब्रह्मविहारस्य अवधारणा तत्प्रासङ्गिकता च (The Concept of Brahma-vihara in BuddhiSt Literature and its relevance) इति विषयमधिकृत्य एका अन्तर्जालीया राष्ट्रिया सङ्गोष्ठी समायोजिता। अस्माकं परिसरः इदानीं पञ्चवर्षीयः सञ्जातः। अतः परिसरस्य NAAC द्वारा निरीक्षणमपि भवेदिति धिया अस्मत्सहकर्मिणः तत्सम्बद्धायै आवश्यक- प्रक्रियायै मूर्तं रूपं दातुं प्रतिबद्धास्सन्ति। एवमेव आन्तरिक-गुणवत्तायां गुणात्मिकां वृद्धिं समानेतुं केन्द्रीय-संस्कृतविश्वविद्यालयस्य अष्टादशी-परियोजनायामावेदनं कर्तुं सहकर्मिणः प्रोत्साहिताः। एवं तस्यै परियोजनायै आवेदनमपि कृतमस्ति परिसरपक्षतः। यथा- आधुनिकसंस्कृतसाहित्यस्य विवरणात्मिका सन्दर्भग्रन्थसूची (DeScriptive Catalogue of Modern SanSkrit Literature), सतीशचन्द्र विद्याभूषणस्य हिस्ट्री आफ इन्डियन लजिक इत्यस्य हिन्द्यनुवादः तथा नैका अन्याश्च परियोजनाः। परिसरीयम् अन्तर्जालम् (website) यत् पूर्वम् उद्घाटितमासीत्

इदानीं क्रमशः व्यवस्थितं क्रियते। तच्च पूर्वं www.srkcampus.org इति नाम्ना उद्घाटितमासीत् तदिदानीं csu-devprayag.edu.in इति सङ्केतेन द्रष्टुं शक्यते। एतदतिरिच्य परिसरीय-पुस्तकालयस्य website मध्ये आनलाईन-शिक्षण-दृष्ट्या पाठ्यक्रम-सम्बद्धानां नैकेषां पुस्तकानां तथा पुरातन-प्रश्नपत्राणां पीडी-एफ अपलोड कृतमस्ति। भविष्यत्काले परिसरे पुस्तकानां तथा हस्तलेखानां च कस्यचित् समृद्ध-पुस्तकालयस्य स्थापनं सङ्कल्पितमस्ति।

✍ **परिसरस्य प्राध्यापकानां कर्मचारिणां कृते सन्देशरूपेण किं वक्तुमिच्छन्ति ?**

☞ ते सर्वे परस्परम् ईर्ष्या-द्वेष-दुराग्रहान् त्यक्त्वा स्वविकासं साधयन्तु श्रेयश्च प्राप्नुवन्तु। जीवने व्यक्तिः स्वकर्मानुगुणं फलं लभते इति मन्त्रे विश्वासं कृत्वा अग्रे सरन्तु, सिद्धिञ्च प्राप्नुवन्तु। परस्परं भावयन्तः श्रेयः परमवाप्स्यथ इत्युक्तिः केवलं देव-मानव-प्रसङ्गेषु -न किन्तु मानवानां प्रसङ्गेष्वपि चरितार्था भवति। वयं सर्वे हीनभावनां (inferiority complex) श्रेष्ठभावनां (Superiority complex) च परित्यज्य कर्म कृत्वा अभीष्टां सिद्धिं प्राप्नुमः। परिसरस्योन्नत्या एवास्माकमुन्नतिरिति तथ्यं सर्वात्मना स्वीकुर्मः।

✍ **लेखनकार्यं कथं कदा प्रारब्धम्? कस्यां विधायां लेखने महती रुचिर्भवताम् ?**

☞ यथा स्मर्यते कथा-लेखनेन साहित्य-लेखनं प्रारब्धमासीत्। ओडिआ मम मातृभाषा वर्तते। ओडिआ-साहित्यपठन-प्रसङ्गे कवितापेक्षया कथाः अधिकं पठिताः। यतोहि आधुनिक-ओडिआ-कवितानामवबोधने प्रारम्भिके स्तरे मया क्लेशः अनुभूयते स्म। प्रारम्भिके स्तरे काश्चन ओडिआकथाः लिखिताः याश्चादौ पुणेतः प्रकाशितायां मधुछन्दापत्रियाकायां प्रकाशितास्ततश्च ताः सकालर मुँह इत्याख्ये ओडिआ-कथासङ्ग्रहे प्रकाशिताः। एवं पुनः मे कवितासु रुचिः अपि संबर्धिता। परिणामतः मम कथासङ्ग्रहात् पूर्वं कविता-सङ्ग्रहौ एव प्रकाशितौ ओडिआ-भाषायां- "वञ्च तुमे मो आयुष नेइ" तथा "कश्चित् कान्ता" चेति। एवमेव संस्कृत-भाषायामपि मम प्रथमः काव्यसङ्ग्रहः सङ्गेमेनाभिरामा 1996 तमे वर्षे प्रकाशिता अभवत्। तत्पश्चाद् व्यथा (1997), ऋतुपर्णा (1999), वेलेंटाइन्-डे-सन्देशः (2000), प्रियतमा, दारुब्रह्म (2001), यात्रा (2002)-प्रभृतिभिः शीर्षकैः नैकानि काव्यसङ्कलनानि प्रकाशितानि। एवं सङ्गेमेनाभिरामातः आरभ्य यात्रां यावत् प्रवर्तितायां मे काव्य-यात्रायां विविधानि भिन्नानि उन्नतावनतानि सोपानानि द्रष्टुं शक्यन्ते। छन्दोबद्ध-कविताभ्यः आरभ्य मुक्तछन्दोबद्धाः कविताः, हाइकु-कविताः यावत्प्रवाहितायां मे काव्य-धारायां वैविध्यपूर्णाः भावतरङ्गाः सम्प्लाविताः भवन्ति। सर्जनात्मक रचनाप्रसङ्गे स्वतन्त्राभिव्यक्तिषु तथा सरल-सरस-प्रयोगेषु मे महती आसक्तिः। काव्येषु सारल्यं भवेत् किन्तु काव्य-शिल्पेषु नावीन्यमपि अपेक्ष्यते ।

प्रकाशितेषु कथासङ्ग्रहेषु नीरवस्वनः (1998), बुभुक्षा (2001), जगन्नाथचरितम् (2003), जिजीविषा (2006) च प्रसिद्ध्यन्ति। ततश्च नैकाः कथाः कथासरित्पत्रिकाया विविधेषु अङ्केषु तथा अन्यासु पत्रिकासु प्रकाशिताः याः द्वयोः कथासङ्ग्रहयोः प्रकाशयितुं शक्यन्ते। मम कथासु प्रायः समाजस्य सहज-सुलभ-जीवनदृश्याणां यथार्थपरकाणि स्वाभाविकानि जीवन्ति च चित्राणि चित्रितानि भवन्ति। कथालेखनप्रसङ्गे मया यथासम्भवं शिल्प-शैली-भाषा-भावबोध-प्रसङ्गेषु आधुनिकतायै प्रश्रयो दीयते। एवं मदीयेषु सर्वेषु कथासंग्रहेषु संक्षिप्तकलेवरयुताः समर्थ-वस्तुविधानपराश्च कथाः सङ्गृहीतास्सन्ति।

मम लेखनरुचिस्तु सर्वासु विधासु वर्तते। आदौ कवितालेखने आसीत्, ततः कथा-लेखने, ततश्च उपन्यासलेखने तथा नाटकलेखने च। द्वयोः उपन्यासयोः द्वयोः नाटकयोश्च रचना पूर्णा अस्ति। प्रकाशनं नैव कृतम्। अचिरादेव करिष्यते।

✍ **यथा भवद्भिरिदानीं सूचिता भवतां ग्रन्थानामेका विस्तृतपरम्परा विद्यते। तत्र च सामान्यजनस्योत्थानदृष्ट्या के के सर्जनात्मक-साहित्य-ग्रन्था विरचिताः ?**

☞ मया नैके गद्य-पद्यात्मका काव्यग्रन्थाः तथा संस्कृत-शोधग्रन्थाश्च प्रणीताः। मदीयाः सर्वाः समकालिक-संस्कृत-साहित्य-रचनाः आधुनिकभावबोधसम्प्रेषणे सर्वथा समर्थाः सन्ति। अत एव ताश्च रचना सामान्यजनस्योत्थानदृष्ट्या महत्त्वपूर्णास्सन्तीति संक्षेपेण वक्तुं शक्यते। एवमेव दशाधिकानां पत्र-पत्रिकाणां शताधिकाः अङ्काः सम्पादिताः। विशिष्य दृक्-पत्रिकायाः 31 अङ्केषु आधुनिक-संस्कृतसाहित्यस्य समीक्षाविश्वं विकसितं संवर्धितं च भवति। कथासरित्-पत्रिकायाः 30 अङ्केषु आधुनिक-संस्कृतकथा-साहित्यं स्वचरमविकासं स्पृशति। पद्यबन्धा- पत्रिकायाः 18 अङ्केषु आधुनिक-संस्कृत-पद्यसाहित्यं स्वविकासयात्रां नित्यं नवीकरोति। एवमेव मत्सम्पादिता विविधा शोधपत्रिकाः संस्कृत-शोधक्षेत्रे अनुसन्धानस्य नवदिशाः सूचयन्ति। तासां पत्रिकाणां संस्कृत-पत्रकारिताक्षेत्रे महद्योगदानं विद्यते। एवमेतेन संस्कृतानुसन्धान-माध्यमेन शिक्षाक्षेत्रस्योत्थानं जायमानमस्ति।

✍ **भवतामिदानीन्तन-लेखन-धारा कीदृशी वर्तते ?**

☞ वस्तुतः मम साहित्य-लेखनस्य धारा किञ्चित् परिवर्तिता। कवितालेखनस्य तथा कथालेखनस्यापि। आदौ मुक्तछन्दोबन्ध-विधामाश्रित्य सामाजिक्यः कविताः लिख्यन्ते स्म। एवमेव क्वचिद् यथार्थ-कल्पना-मिश्रिताः प्रणयकविताः अपि लिख्यन्ते स्म। पारम्परिक-छन्दसा सामाजिक्यः कविताः लिखिताः यासां सङ्कलनं सङ्गमेनाभिरामा इत्याख्ये काव्यसङ्ग्रहे कृतमस्ति। किन्तु अनन्तरं यात्रावृत्तसाहित्यलेखने प्रवृत्तिरजायत। अद्यावधि अन्यूनानि दशाधिकानि यात्रावृत्त-परकाणि खण्डकाव्यानि लिखितानि। यथा – सोमनाथायनम्, प्रयागप्रयाणम्, वदरीशशतकम्, केदायारायणम्, वैष्णोदेवीशतकम्, चन्द्रवदनीमहिमामृतम्, नवदुर्गायणम्, जगद्गुरुचरितामृतम्, कोटेश्वरायणञ्चेत्यादीनि। अन्यानि द्वित्राणि इदानीं लिख्यन्ते। तेषां यात्रावृत्त-काव्यानां प्रकाशनं प्रायः पत्र-पत्रिकासु विशिष्य पद्यबन्धापत्रिकायामभवत्। न केवलं यात्रावृत्त-काव्यानि किन्तु अनुष्टप्-छन्दसा सामाजिकानि खण्डकाव्यानि अपि लिखितानि।

यथा–प्रतिवेशीशतकम्, मातृशतकम् तथा पद्यबन्धायां प्रकाशितं कोरोणायणम्। एवमेव महाकाव्यमपि लिखितम्-महात्म महात्म्यम्, देवभूमिप्रयाणम्। कथालेखनप्रसङ्गेऽपि परिवर्तनमागतम्। पूर्वं सामाजिक्यः लघुकथाः लिख्यन्ते स्म। इदानीन्तु ललितकथालेखने, व्यङ्ग्यकथालेखने, ललितनिबन्धलेखने च अभिरुचिर्वर्धिता। अद्यत्वे शास्त्रलेखनेऽपि प्रवृत्तिर्जायते। मया कारिकामाध्यमेन शास्त्रीयशोधविषयाणां तथा च ऐतिहासिकविषयाणामुपस्थापनं क्रियते। तद् यथा हस्तलेखशास्त्रम्, काव्यतत्त्वसमन्विति: (आधुनिकसंस्कृतकाव्यशास्त्रम्), पाश्चात्यदर्शनकारिका, भारतीय-दर्शनकारिका चेत्यादीनि कारिकामयशास्त्राणि लिखितानि यत्र सिद्धान्तेन सममितिहासोऽपि चर्चितः।

✍ **भवन्तो दशकत्रयात् संस्कृत-पत्रकारितया सम्बद्धाः सन्ति। विगतेषु वर्षेषु भवद्भिः दशाधिक-संस्कृतपत्रिकाणां सम्पादनं कृतम्। भवद्दृष्ट्या भवतः किं विशिष्टं योगदानमस्मिन् क्षेत्रे वर्तते ?**

☞ सत्यमुक्तं भवद्भिः। विगतेषु वर्षेषु दृक्-कथासरित्-पद्यबन्धा-लोकप्रज्ञा-उशती-मधुछन्दा-शाश्वती-विश्ववारा-शाब्दीत्रिपथगा-गङ्गानाथ-झापरिसर-शोधपत्रिकातिरिक्तानां नैकेषामभिनन्दनाङ्कानां स्मृत्यङ्कानां च सफलं सम्पादनं मया कृतम्। एतत्क्षेत्रे मे विशिष्टं योगदानं किमिति भवन्तः विचारयन्तु। संक्षिप्य वदामि चेत् कथासरित्-पद्यबन्धा-माध्यमेन अस्माभिः नूतन-संस्कृत-कथाकारेभ्यः नूतन-संस्कृत-कविभ्यश्च कश्चन विशिष्ट एव मञ्चः प्रदत्तः। विपुलसंख्यायां मौलिकानूदित-कथा-कवितानां प्रकाशनमनयोः पत्रिकयोः माध्यमेनाभवत्, भवति च साम्प्रतम्। पक्षान्तरे दृक्-पत्रिका-माध्यमेन अस्माभिः समकालिक-संस्कृतसाहित्य-प्रसङ्गे नूतन-समीक्षक-निर्माणे विशिष्टा काचिद् भूमिका निर्व्यूढा। अनया पत्रिकया संस्कृत-साहित्यस्य सामग्रिकं समीक्षणं कृत्वा समग्रे देशे समकालिक-संस्कृतसर्जकेभ्यः एकः समीक्षामञ्चः समर्पितः। वस्तुतः दृशः अवतारो नाम कश्चन स्वागतयोग्यः प्रकल्पः अस्ति। अद्यत्वे बहवः शोधछात्राः आधुनिक-संस्कृतसाहित्यत्वविषयान् गृहीत्वा स्वशोधकार्यं सम्पादयन्ति। तेषां कृते दृक्-पत्रिकायां प्रकाशितं विपुलं समीक्षा-साहित्यमनिवार्यं वर्तते इत्यनुभवामः। यावान् सम्प्रति जायमानस्य साहित्यिक-मूल्याङ्कनस्य तटस्थता-विषयको प्रश्नः तद्विषये एतदेव वक्तव्यमस्ति यत् संस्कृते साहित्यिक-मूल्याङ्कनं तटस्थं निष्पक्षं च न भवति। दलबन्धनं वा गणबन्धनं (गुटवाजी) वा न केवलमद्यतनीय-साहित्यकाराणां प्रसङ्गे किन्तु अद्यतनीय-समीक्षकाणां प्रसङ्गेऽपि अवलोक्यते। प्रान्त-भाषा-जाति-धर्म-मित्रताद्याधारेण अद्यापि साहित्यिकं मूल्याङ्कनं समकालिक-संस्कृतसाहित्यं प्रभावयति। परन्तु तथापि क्रमशः काचित् सन्तोषप्रदा एव परिणतिः समक्षम् आयातीति निसन्देहं वक्तुं शक्यते। एवमेव गङ्गानाथ-झापरिसर-शोधपत्रिकाणां प्रकाशनं विगतदशकेषु समयानुवर्ति नासीत्। यदा मया सम्पादकदायित्वं निर्व्यूढं तत आरभ्य अत्रागमनात् पूर्वमहमेतस्याः पत्रिकायाः प्रकाशनं समयानुवर्ति कृतमासीत्। अर्थात् 2016 तमस्य वर्षस्य अङ्कः 2016 तमे एव वर्षे प्रकाशित आसीत्। इदानीं न जाने कीदृशी स्थितिः वर्तते। अस्तु, किं बहुना, उपर्युक्तानामेतासां समासां पत्रिकाणां (दृक्-कथासरित्-पद्यबन्धादीनां) प्रकाशनमद्यत्वे सार्थकं मन्यते। तत्राहं स्वकीयं योगदानं स्मारं स्मारं प्रसीदामि।

केचन अधुनाऽपि संस्कृत-पत्रकारितायाः क्षेत्रं सीमितं मन्वते। किन्तु एतत् सर्वथा सत्यं नास्ति। अद्यावधि अस्माकं देशे त्रिशताधिकानां संस्कृत-पत्रिकाणां प्रकाशनं जातं, तासु च अद्यतनं दिनाङ्कं यावत् शताधिकानां संस्कृत-पत्रिकाणां प्रकाशनं भवतीति तथ्यं प्रमोदास्पदम्। यथा मया अनुभूयते संस्कृत-पत्रकारितां प्रति जनानामाकर्षणमनुदिनं वर्धमानं वर्तते। तत्र ममापि योगदानं किञ्चिद् भवेदिति अहं विभावयामि।

**✍ यथा वयं जानीमः भवान् विगतदशकद्वयाद् विगतदशकत्रयाद् वा संस्कृत-पत्रकारितया सम्बद्धोऽस्ति। संस्कृत-पत्रकारिताया विकासार्थमस्माभिः किं कर्तव्यम् ?**

☞ यस्याः कस्या अपि पत्रिकायाः प्रकाशन-समये तस्योद्देश्यं स्पष्टं भवेत्। केवलं पत्रिका-प्रकाशनार्थं पत्रिकाणां प्रकाशनं न भवेत्। केवलं सम्पादको भवितुमथवा परिवार- सदस्यानाम्, इष्टमित्राणां तथा शिष्यादिनां च लेखानां प्रकाशनार्थं पत्रिकाणां प्रकाशनमुचितं न भवति। अद्यत्वे पत्रिकाणां कृते सहजतया ISSN संख्या अप्युपलभ्यते। इदानीं वृत्तये तथा पदोन्नतये च लेखानां प्रकाशनमनिवार्यम्। एवमेव शोधछात्राणां शोधप्रबन्ध-समर्पणावसरेऽपि द्वयोः शोधलेखयोः प्रकाशनमनिवार्यम् । अस्यां स्थितौ लेखानां प्रकाशनार्थं सम्पादकानामुपरि बाह्यप्रभावो भवति । परिणामतः क्वचित् केचन सम्पादकाः प्रकाशकाश्च व्यवसाये प्रवृत्ता भवन्ति।

संक्षिप्य वदामश्चेत् पत्रकारिता-प्रसङ्गे पत्रिकाणां लक्ष्यं स्पष्टं भवेत्। पत्रकारितायाः पृष्ठभूमिः का तस्याः कर्तव्यं किमित्येतत् सर्वं स्पष्टं भवेत्। पत्रिकाया आनुक्रमिक-स्वरूपस्य परीक्षणमपि आवश्यकं भवति। आवश्यकता नास्ति यदारम्भिकं स्वरूपं यथा आसीत् वर्तमान- स्वरूपं तथा भविष्यत् स्वरूपं च तथैव स्यात्।

इदानीमाधुनिक्याः संस्कृत-पत्रकारितायाः स्थितिः कीदृशी वर्तते - तदपि ज्ञातव्यम्। न केवलं संस्कृत-पत्रकारिताया परिवर्तित-रूपं प्रति अपितु संस्कृत-पत्रकारिता-सम्बद्ध-समस्याः तत्समाधानानि प्रति च सचेतनता आवश्यकी। साम्प्रतिकाः सम्पादकाः, पाठकाः, लेखकाः, समीक्षकाः वा, सर्वेषां मार्गे अनेकविधाः समस्या भवन्ति। पाठकान् पृथक्कुर्मश्चेत् अन्येषां त्रयाणाम् (सम्पादकानां, लेखकानां तथा समीक्षकाणाम्) एका एव प्रमुखा समस्या - पाठकाभावः। पाठकानां समक्षमपि उत्तमरचनानामभावः।

संस्कृत-पत्रिका-शृङ्खलायाम् उत्कृष्टाः खेलपत्रिकाः, विज्ञानपत्रिकाः, मनोरञ्जन-पत्रिकास्तथा बाल-पत्रिकाश्च न सन्ति। अस्यां दिशि अपि प्रयासो भवेत्।

**✍ संस्कृत-पत्रकारितां जनसामान्येन योजयितुं के चोपाया अवलम्बनीयाः ?**

☞ सर्वादौ संस्कृतभाषां, शास्त्रं तथा साहित्यञ्च जनसामान्यं यावत् प्रापयितव्यम्। जनसामान्यो यदा संस्कृत- भाषां तत्साहित्यं च प्रति रुचिशीलो भविष्यति तदा तच्छास्त्रैश्च लाभान्वितो भवितुमभिलषिष्यति। ततः तद्विषये अधिकं ज्ञातुं संस्कृत-पत्र-पत्रिकाः अपि द्रष्टुं प्रयतिष्यते। तदर्थमस्माभिः संस्कृते प्रकाशिताः पत्र-पत्रिकाः जनसामान्य- रुच्यनुकूला निर्मातव्याः। आवश्यकतायां सत्यां ताश्च पत्र-पत्रिकाः बहुभाषीयाः कर्तुं शक्यन्ते। जनसामान्यस्य कल्याणाय तासां पत्र-पत्रिकाणां लिप्यन्तरणमपि कर्तुं शक्यते।

संस्कृत-पत्रकारितां जनसामान्यस्तरे आनेतुं केचन अल्पावधिकाः पाठ्यक्रमाः सञ्चालयितव्याः। सौभाग्यात् केन्द्रीयसंस्कृतविश्वविद्यालये (प्राक्तने राष्ट्रिय-संस्कृत-संस्थाने) संस्कृत-पत्रकारितायाः प्रमाणपत्रपाठ्यक्रमः सञ्चाल्यते दूरस्थशिक्षामाध्यमेन। अयमप्युपक्रमः संस्कृत-पत्रकारितायै शुभलक्षणम्। वस्तुतः एतत् सर्वं कार्यं कश्चन एकाकी कर्तुं न शक्नोति। तदर्थं संस्कृत-पत्रकार-संघस्यापि आवश्यकता वर्तते। विगत-दशकाद् अस्यां दिशि किञ्चित् महत्त्वपूर्णं कार्यमपि जातम्।
यथा देहल्यां भारतीय-संस्कृत-पत्रकार-संघस्य निर्माणमपि अभवत् । अन्ते च एकेन परामर्शेण एतत्प्रसङ्गमुपसंहर्तुमिच्छामि यत् संस्कृत-पत्र-पत्रिकाणां प्रकाशन-प्रबन्धन-विज्ञापन-उपार्जन-मुद्रण-प्रकाशन-वितरण-प्रेषण-सम्पादन-विषयक-दायित्वानां पौनःपुन्येन परिशीलनं भवेत् तथा आवश्यकतानुसारं तत्र संशोधनमपि भवेत्। सम्पादक- वार्ताहराणामर्हता-विषयक-गुणावगुणानामपि पुनर्मूल्यायनं भवेत्।

**✍ स्वरचनाविशेषतायै भवद्भिः के के पुरस्कारास्समर्जिताः ?**

☞ स्वरचनायै स्वरचनाविशेषतायै मया नैके राष्ट्रिय-पुरस्काराः समर्जिताः। तेषु बाणभट्टपुरस्कार-भाउरावदेवरससेवान्यास-गोस्वामि-गिरिधरलाल-गद्यरचना-पुरस्कार-पण्डितराजजगन्नाथ-पद्यरचनापुरस्कार-अखिलभारतीय-मौलिक-संस्कृत-कथारचनापुरस्कार-विविधपुरस्कार-संस्कृतमहामहोपाध्याय सम्मानादयश्चोल्लेखमर्हन्ति। स्व-संस्कृत-कथा-रचनायै कोलकतास्थ-भारतीय-भाषापरिषदा अपि सम्मानितः। कथासरितः उत्कलतरङ्गे मदीयः साक्षात्कारः प्रकाशितः। ततः पूर्वं लोकभाषासुश्र्यामपि मे साक्षात्कारः प्रकाशितः आसीत्।

**✍ भवता अद्यावधि साहित्य-अकादमी-पुरस्कारो न लब्धः। तद्विषये भवतां किमभिमतम् ?**

☞ पञ्चषेभ्यः वर्षेभ्यः मम मित्राणि बन्धवः तथा हितैषिणश्च वदन्ति यदिदानीं भवता साहित्य-अकादमी-पुरस्कारो लब्धव्यः। ते किमर्थमेवं वदन्ति इत्यहं न जानामि। अहं किन्तु तेन पुरस्कारेण विना अपि प्रसन्नोऽस्मि। परन्तु एतेन मम कार्यस्य किञ्चिन्मूल्याङ्कनं भवतीति अहं विभावयामि। एतादृशी भावना एव वस्तुतः मत्कृते पुरस्कारो वर्तते। साहित्य-अकादमी रचनाः पुरस्करोति न तु रचनाकारान्। किन्तु इदानीं रचना एव मया न प्रकाश्यन्ते। मम साहित्यन्तु इदानीं केवलं पत्र-पत्रिकासु प्रकाश्यते। तर्हि पुरस्कारस्य सम्भावना कुत्र।

✍ **अधुना समाजे कीदृशी रचना काव्यदृष्ट्या विषयदृष्ट्या च आवश्यकी ?**

☞ सामाजिक्यो यथार्थवादिन्यो रचनास्समधिका भवेयुः। ताश्च रचनाः सरसया सरलया सर्वजनसंवेद्यया च शैल्या निर्मितास्स्युः येन ताश्च स्वत एव जनसामान्यानां हृदये प्रविशेयुः। सामाजिको यः कोऽपि विषयो भवेद् यत्र सामाजिक-विसङ्गतयस्तथा तासां समाधानानि च सङ्केतितानि स्युः।

✍ **नूतन-रचनाकाराणां कृते कोऽपि उपदेशः सन्देशश्च ?**

☞ नूतना रचनाकारा स्वरचनासु मौलिकतामानयेयुः। मौलिकतां विना साहित्यम् उपोत्पादरूपं भवति। रचनाकारैः स्वशैली अपि निर्मातव्या भवति यां शैलीं दृष्ट्वा तत्तद्रचनाकारस्य रचना अभिज्ञातुं शक्यते। नूतनैः रचनाकारैः बलान्न किमपि लेखनीयम्। यस्मिन् कस्मिन् विषये लेखनी चालयितुं यदि अन्तश्चेतना प्रवर्तयति तर्हि लेखने प्रवृत्तिः लोककल्याणाय भवति। प्रतिस्पर्धा विकासस्य मार्गमुन्मोचयति। किन्तु प्रतिस्पर्धा सर्वदा समसामयिकैः सह युज्यते न तु वरिष्ठैः कनिष्ठैर्वा। प्रतिस्पर्धायां कमपि अधः पातयित्वा उपरि गमनीयं न भवति। स्वप्रतिभाबलेन अन्येषु स्वकीयमस्तित्वं, स्वातन्त्र्यं, वैशिष्ट्यञ्च स्थापनीयं भवति।

✍ **संस्कृतं जनसामान्यस्य भाषा केन प्रकारेण भवितुं शक्नोति ? तदर्थं के के उपाया अनुकरणीयाः ?**

☞ संस्कृतं जनसामान्यस्य भाषा भवितुमर्हति, भवेदपि। किन्तु तदर्थं महान् यत्नः अपेक्ष्यते। एकस्याः संस्थायाः, एकस्या व्यक्तेर्वा प्रयत्नेन तल्लक्ष्यं साधयितुं न शक्यते। तदर्थं सम्भूय यत्नः करणीयः। नूतना उपायाश्चिन्तनीयाः। अत्याधुनिक-तकनिकीनां प्रयोगेण विनूतनाः सम्भावना अन्वेषणीयाः। तदर्थं संस्कृतज्ञानां प्रतिबद्धता दृश्यते। किन्तु दीर्घो मार्गः अतिक्रमणीयो वर्तते।

✍ **शिक्षितसमाजस्य का परिभाषा भवतां मते ?**

☞ पुस्तकं पठित्वा न कोऽपि शिक्षितो भवितुमर्हति। पुस्तकस्थं ज्ञानमुपाधये भवति। आदौ व्यक्तिः शिक्षितो भवेत्। व्यक्तयः शिक्षिताश्चेत् तर्हि समाजोऽपि स्वतः शिक्षितो भविष्यति। 'अधीतिबोधाचरणप्रसारणै'रित्युक्तिः नैषधकारस्य श्रीहर्षस्य प्रसिद्ध्यति। आदावध्ययनं, ततः अवबोधः ततश्च आचरणं तथा ततश्च प्रसारणम्। एतेषां क्रमाणामात्मसात्करणे समाजश्शिक्षितो भवितुमर्हति। वस्तुतः अहमपि सन्त-कवीरस्य अस्यां सूक्तौ विश्वसिमि - 'पोथी पढ पढ जग मुआ पण्डित भया न कोय'। यश्च समाजः स्वसमाजस्य विकासे स्वकीयं योगदानं निश्चिनोति, तथा सम्पूर्णं समाजं सभ्यं सुसंस्कृतं च कर्तुं प्रयासरतो वर्तते, स एव समाजः शिक्षितसमाजः।

✍ **अधुना कोरोनाकालसन्दर्भे समाजाय किं वक्तुमिच्छन्ति ?**

☞ वस्तुतः जीवनस्य क्षणिकताविषये कोरोना अस्मान् स्मारितवती। अतः एतदवसरे समाजाय एतं सन्देशं प्रदातुमिच्छामि यद् यानि शुभकर्माणि कर्तुं मनसि सङ्कल्पो वर्तते तानि शुभस्य शीघ्रमिति न्यायेन त्वरितमेव सम्पादनीयानि। अन्यथा कालः पिबति तद्रसमिति सूक्तिः चरितार्था भविष्यति। जीवने एकस्मिन् प्रसङ्गे त्रुटिः एकवारं भवितुमर्हति। किन्तु तस्याः त्रुटेः पुनरावृत्तिः न भवेत्। वस्तुतः कालः वारम्वारं संशोधनाय अवसरान् न ददाति।

✍ **सादरं धन्यवादाः, वर्धापनानि भूयांसि नमो नमः !**

☞ भवद्भ्यः अपि हार्दाः धन्यवादाः। शुभमस्तु। कल्याणमस्तु। जयतु संस्कृतम्। जयतु भारतम्।



## निदेशकानां प्रो.बनमाली-बिश्वाल-महोदयानां शैक्षिकाः गतिविधयः
## (जनवरी 2021-जुलाई 2021)

| | |
|---|---|
| 18.01.2021 | केन्द्रीय-संस्कृविश्वविद्यालयस्य श्रीरघुनाथ-कीर्ति-परिसरस्य निदेशकत्वेन कार्यभारग्रहणम्। |
| 13.02.2021 | परिसरीय- ज्योतिष-विभागीयायामन्तर्जालीयायां राष्ट्रिय-सङ्गोष्ठ्यामध्यक्षीयमुद्बोधनम्। |
| 14.02.2021 | परिसरीय- व्याकरण-विभागीयायामन्तर्जालीयायाम् अन्ताराष्ट्रिय-सङ्गोष्ठ्यामध्यक्षीयमुद्बोधनम्। |
| 20.02.2021 | परिसरीय- वेद-विभागीयायामन्तर्जालीयायाम् अन्ताराष्ट्रिय-सङ्गोष्ठ्यामध्यक्षीयमुद्बोधनम्। |
| 21.02.2021 | परिसरीय-साहित्य-विभागीयायामन्तर्जालीयायां राष्ट्रिय-सङ्गोष्ठ्यामध्यक्षीयमुद्बोधनम्। |
| 27.02.2021 | परिसरीय- आधुनिक- विभागीयायामन्तर्जालीयायां राष्ट्रिय-सङ्गोष्ठ्यामध्यक्षीयमुद्बोधनम्। |
| 28.02.2021 | परिसरीय- दर्शन- विभागीयायामन्तर्जालीयायां राष्ट्रिय-संगोष्ठ्यामध्यक्षीयमुद्बोधनम्। |
| 14.05.2021 | परिसरस्य आधुनिक-संस्कृत-साहित्य-संसाधन-केन्द्रानुकुल्येन बालसाहित्य-विषयिण्याम् अमन्तर्जालीयायां राष्ट्रिय-सङ्गोष्ठ्यामध्यक्षीयमुद्बोधनम्। |
| 14.05.2021 | परिसरीय-आधुनिक-संस्कृत-साहित्यानुसन्धान-केन्द्रस्यानुकुल्येन बालसाहित्य-विषयिण्याम् अमन्तर्जालीयायां राष्ट्रिय-सङ्गोष्ठ्यामेव तद्विरचितस्य संस्कृतवर्णमालागीतस्य लोकार्पणम्। |
| 15.05.2021 | परिसरीय-पाण्डुलिपि-संरक्षण-अनुसन्धान- केन्द्रस्यानुकुल्येन हस्तलेखसम्पादनविधिविषयिण्याम् अन्तर्जालीयायां राष्ट्रिय-सङ्गोष्ठ्यामध्यक्षीयमुद्बोधनम्। |
| 26.01.2021 | 72 तमे गणतन्त्रदिवसे राष्ट्र-ध्वजोत्तलनम् परिसरनाम्ना उद्बोधनञ्च। |
| 25.01.2021 | 72 तमे गणतन्त्रदिवसोपलक्ष्ये तत्पूर्वसन्ध्यायां परिसरे समायोजितायाम् राष्ट्रीय-चेतना-विषयिण्यां राष्ट्रीय-कविगोष्ठ्यां अध्यक्षीयमुद्बोधनम् संस्कृते काव्यपाठश्च। |
| 28.01.2021 | भद्रकस्थेन सरस्वती-गवेषणा-प्रतिष्ठानेने समायोजिते अन्तर्जालीय-बौद्धिक-चर्चासत्रे 'विज्ञानस्य भाषा संस्कृतम्' इति विषयमधिकृत्य विशिष्टं व्याख्यानम्। |
| 31.01.2021 | भुवनेश्वर-संस्कृत-परिषदा आयोजिते राष्ट्रिय-कविसमवाये संस्कृते काव्यपाठः। |
| 03.02.2021 | 'संस्कृत वाङ्मय की प्राचिन व्याख्यापरम्परा में नवीन शोधप्रविधि' इति विषयमधिकृत्य विशिष्टं व्याख्यानम्। |
| 16.02.2021 | वसन्तपञ्चम्यवसरे सहकर्मिभिश्च छात्रैश्च सरस्वतीपूजनम्। |
| 16.02.2021 | केन्द्रीय-संस्कृत-विश्वविद्यालयस्य लखनउ-परिसरे वसन्तपञ्चम्यवसरे साहित्य-समृद्ध्याख्ये कविसम्मेलने वरिष्ठकविरूपेण संस्कृत-काव्यपाठः। |
| 17.02.2021 | केन्द्रीय-संस्कृत-विश्वविद्यालयस्य जम्मुस्थे रणवीर-परिसरे साहित्य-विभागेन समायोजिते कविसम्मेलने संस्कृत-काव्यपाठः। |
| 21.02.2021 | परिसरे मातृभाषा-दिवसावसरे अन्तर्जालीयायां राष्ट्रिय-संगोष्ठ्यामध्यक्षीयमुद्बोधनम्। |
| 02.03.2021 | पुणेस्थे सावित्रि-बाई फुले-पुणे-विश्वविद्यालयस्य प्रगत-संस्कृत-अध्ययनकेन्द्रे 'संस्कृते अनुवादपरम्परा' इति विषयमधिकृत्य आयोजितायाम् अन्तर्जालीयायां राष्ट्रिय-संगोष्ठ्यामध्यक्षीयमुद्बोधनम्। |
| 06.03.2021 | गुर्जर-प्रदेशे देशाई-चन्दुलाल-मणिलाल-कला-वाणिज्य-महाविद्यालये कवीरः कालिदासश्च इति विषयिण्याम् अन्तर्जालीयायां राष्ट्रिय-सङ्गोष्ठ्यामध्यक्षीयमुद्बोधनम्। |
| 10.03.2021 | केन्द्रीय-संस्कृत-विश्वविद्यालयस्य लखनउ-परिसरे 'हस्तलेखशास्त्रस्यालोके पाण्डुलिपिविज्ञानविमर्शः' इति विषयमधिकृत्य विशिष्टं व्याख्यानम्। |
| 20-21.03.2021 | हरिद्वारस्थे श्रीभगवान्दास-आदर्श-संस्कृत-महाविद्यालये केन्द्रीय-संस्कृत-विश्वविद्यालयस्य सदस्य-सचिवरूपेण निरीक्षणम्। |
| 21.03.2021 | उत्तराखण्ड-संस्कृत-अकादम्या आयोजिते शोधसम्मेलने सायंकाले अखिलभारतीये कविसमवाये अध्यक्षीयमुद्बोधनं संस्कृत- काव्यपाठश्च। |
| 05.06.2021 | विश्वपर्यावरण-दिवसावसरे परिसरे अन्तर्जालीयायां राष्ट्रिय-सङ्गोष्ठ्यामध्यक्षीयमुद्बोधनम्। |
| 21.06.2021 | अन्ताराष्ट्रिय-योगदिवसावसरे परिसरे योगविषयिण्याम् अन्तर्जालीयायां राष्ट्रिय-सङ्गोष्ठ्यामध्यक्षीयमुद्बोधनम्। |
| 30.05.2021 | शङ्कराचार्यजयन्त्यवसरे जगद्गुरुचरितामृतमित्यास्मात् स्वरचितात् खण्डकाव्यात् काव्यमुखेन शङ्कराचार्यचरितव्याखानम्। |
| 30.05.2021 | वडौदास्थे अर्वाचीन-संस्कृत-साहित्यपरिषदि 'कोरोना-काव्यपाठः संवादः तथा समालोचना' इति विशेषसंवादः काव्यपाठश्च। |
| 25.06.2021 | हरिद्वारस्थे श्रीभगवान्दासआदर्श-संस्कृत-महाविद्यालये अन्तर्जालीय-विद्वत्सङ्गोष्ठ्यां व्याख्यानं काव्यपाठश्च। |

## डॉ.सच्चिदानन्दस्नेही

25-01-2021 श्रीरघुनाथकीर्तिपरिसरे कविसंगोष्ठ्याः संयोजनं काव्यपाठश्च।

28-02-2021 श्रीरघुनाथकीर्तिपरिसरस्य दर्शनविभागे "दर्शनशास्त्रेषु अभिनवप्रवृत्तयः" इत्याख्यायाः संगोष्ठ्याः संयोजनम्।

15-05-2021 श्रीरघुनाथकीर्तिपरिसरस्य 'हस्तलेखसम्पादनविधिः' इत्याख्यायाः सङ्गोष्ठ्याः संयोजनम्।

21-06-2021 आईसीपीआर तथा श्रीरघुनाथकीर्तिपरिसर इत्यनयोः संयुक्ततत्वाधानेन 'भारतीय योगपरम्परा की उत्पति एवं विकास' इत्याख्यायाः सङ्गोष्ठ्याः संयोजनम्।

01-05-2021 तः 15-05-21 पर्यन्तं वेदवेदान्ताध्ययनशोधसंस्थानं संस्कृतभारतीविद्वत्परिषद् देहलीद्वारा आयोजितायां कार्यशालायां भागग्रहणम्।

17.02.2021 सोमनाथसंस्कृतविश्वद्यालये सिद्धान्तानामवबोधने लौकिकन्यायानामुपयोगिता इति विषयान्वितायां सङ्गोष्ठ्यां भागग्रहणम्।

18-02-2021 किशोरभारतीभगिनीनिवेदिता कोलेज बेहला कोलकाता इत्यत्र वसुधैव कुटुम्बकमिति विषयान्वितायां सङ्गोष्ठ्यां भागग्रहणम्।

14-02-2021 केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरस्य व्याकरणविभागे अन्ताराष्टियसङ्गोष्ठ्यां पत्रवाचनम् अकरोत्।

20-02-2021 केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरस्य वेदविभागे अन्ताराष्टियसङ्गोष्ठ्यां पत्रवाचनम् अकरोत्।

21-02-2021 केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरस्य साहित्यविभागे राष्टियसङ्गोष्ठ्यां पत्रवाचनम् अकरोत्।

27-02-2021 केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरस्य आधुनिकविभागे राष्टियसङ्गोष्ठ्यां पत्रवाचनम् अकरोत्।

14-05-2021 केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरस्य आधुनिकसंस्कृतसाहित्यसंसाधनकेन्द्रे राष्टियसङ्गोष्ठ्यां पत्रवाचनम् अकरोत्।

15-05-2021 केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरस्य पाण्डुलिपिसंरक्षणानुसन्धानकेन्द्रस्य राष्ट्रियसङ्गोष्ठ्यां पत्रवाचनम् अकरोत्।

07-04-2021 ल.ना.मि.वि-विश्वविद्यालयस्य संस्कृतविभागे (दरभङ्गा, बिहारप्रदेशे) अन्ताराष्टियसङ्गोष्ठ्यां पत्रवाचनम् अकरोत्।

## डॉ.शैलेन्द्रप्रसाद उनियालः

13.01.2021 दिनाङ्के उत्तराखण्ड-दूरदर्शनकेन्द्रे देहरादूने 'आस्था का प्रतीक कुम्भमहापर्व' इति विषयमधिकृत्य दूरदर्शन परिचर्चा सञ्चालिता।

25.01.2021 दिनाङ्के केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरे 72तमस्य गणतन्त्रदिवसस्य पूर्वसन्ध्यायां आभासीयपटले राष्ट्रियकविसम्मेलनस्य सञ्चालनपूर्वकं भारतवैभवमिति शीर्षकान्वितं काव्यं प्रस्तुतम्।

31.01.2021 दिनाङ्के मार्त्तण्डवेदविज्ञानानुसंधानसंस्थानेन समायोजिते राष्ट्रियवेदसम्मेलने सत्राध्यक्ष्यं 'बालकानां बुद्धिवर्धनोपायाः' इति विशिष्टव्याख्यानं च प्रस्तुतम्।

13.02.2021 दिनाङ्के आभासीयपटले ज्योतिषविभागे सत्रसञ्चालनपुरस्सरं शोधपत्रं प्रस्तुतम्।

14.02.2021 दिनाङ्के आभासीयपटले व्याकरणविभागीयान्ताराष्ट्रियसङ्गोष्ठ्याः सत्रसञ्चालनपुरस्सरं शोधपत्रं प्रस्तुतम्।

16.02.2021 दिनाङ्के श्रीवसन्तपञ्चम्यां शारदाम्बिकायाश्च पञ्चाङ्गपीठवरिवस्यापूर्वकं होमकर्मणः सम्पादनम् । पूजार्चन-कर्मेदं तत् संयोजकत्वेन निदेशकानामाध्यक्ष्ये च सुसम्पन्नम्।

20.02.2021 दिनाङ्के आभासीयपटले वेदविभागीयान्ताराष्ट्रियसङ्गोष्ठ्याः सञ्योजनं स्वागतभाषणपूर्वकं विषयप्रवर्त्तनं शोधपत्रञ्च प्रस्तुतम्।

05.03.2021 दिनाङ्के केन्द्रीयसंस्कृतविश्वविद्यालयस्य लखनऊपरिसरे "माध्यन्दिनमन्त्रब्राह्मणयोः स्वरोच्चारणविधिविमर्शः" इत्यस्मिन् विषये आभासीयपटले विशिष्टव्याख्यानं विहितम्।

06.04.2021 दिनाङ्के अधिसूचनया भारतसर्वकारशिक्षामन्त्रालयद्वारा महर्षिसान्दीपनिवेदविद्याप्रतिष्ठानस्य माननीय-सदस्यः नामितः।

11.04.2021 तः 14.04.2021 दिनाङ्कं यावद् उत्तराखण्डदूरदर्शनस्य कार्यशालायां च कुम्भपर्वणः भाष्यकारत्वेन समीक्षा-कर्म सम्पादितम्।

**डॉ.अनिलकुमारः**

- 25.01.2021 दिनाङ्के श्रीरघुनाथकीर्तिपरिसरेण आयोजिते अखिलभारतीयकविसम्मेलने काव्यपाठः, सञ्चालनञ्च।
- 14.02.2021 दिनाङ्के रा.सं.म. एवं डा. राजेन्द्रप्रसादकेन्द्रीयकृषिविश्वविद्यालयेन (पूसायाम्) आयोजितायामन्तर्जलीयायां राष्ट्रियसङ्गोष्ठ्यामुपस्थितिः।
- 18.02.2021 दिनाङ्के किशोरभारतीभगिनीनिवेदितामहाविद्यालयेन आयोजितायाम् अन्तर्जलीयान्ताराष्ट्रिय-सङ्गोष्ठ्यामुपस्थितिः।
- 27.02.2021 दिनाङ्के श्रीरघुनाथकीर्तिपरिसरस्य (वेदविभागे) राष्ट्रियसङ्गोष्ठ्यां पत्रवाचनम्।
- 21.02.2021 दिनाङ्के श्रीरघुनाथकीर्तिपरिसरस्य (साहित्यविभागे) राष्ट्रियसङ्गोष्ठ्याम् पत्रवाचनम्, सञ्चालनम्, सचिवत्वेन च उपस्थितिः।
- 27.02.2021 दिनाङ्के श्रीरघुनाथकीर्तिपरिसरस्य (आधुनिकविभागे) राष्ट्रियसङ्गोष्ठ्यां पत्रवाचनम्।
- 28.02.2021 दिनाङ्के श्रीरघुनाथकीर्तिपरिसरस्य (न्यायविभागे) राष्ट्रियसङ्गोष्ठ्यां पत्रवाचनम्, सञ्चालनञ्च।
- 01.03.2021 तः 03.03.2021 दिनाङ्कपर्यन्तं गवर्मेन्टसंस्कृतमहाविद्यालयस्य(वेदान्तविभागे) तिरुपुनीथुरायां व्याख्यानमालायां प्रतिभागीत्वेनोपस्थितिः।
- 08.03.2021 दिनाङ्के मयनगूरीमहाविद्यालयस्य (पश्चिमबंगप्रदेशे) महिलादिवसस्यान्तर्जालीयसर्वेक्षणकार्यक्रमे भागग्रहणम्।
- 15.03.2021 दिनाङ्कात् 08-04-2021दिनाङ्कपर्यन्तं श्रीरघुनाथकीर्तिपरिसरस्य आचार्यशास्त्री इत्यनयोः अन्तर्जालीयपरीक्षायां संयोजकत्वेनोपस्थितिः।
- 23.03.2021 दिनाङ्के रा.सं.म.-श्रीमतीसी.आर.डी.गार्डी-आर्टमहाविद्यालयाभ्यां मुनपुरे (महीसागरे,गुर्जरप्रदेशे) आयोजितायाम् अन्तर्जलीयान्ताराष्ट्रियसङ्गोष्ठ्यां पत्रवाचनम्।
- 26.03.2021 दिनाङ्के रा.सं.म. एवं संस्कृतसाहित्यपरिषदा लक्ष्मीबाई-महाविद्यालयेन(दिल्लीविश्वविद्यालये) आयोजितायाम् अन्तर्जलीयान्ताराष्ट्रियसङ्गोष्ठ्याम् उपस्थितिः।
- 18.04.2021 दिनाङ्के राष्ट्रियसंस्कृतमञ्चेन (नवदेहल्याम्) आयोजितायाम् अन्तर्जालीयान्ताराष्ट्रियसङ्गोष्ठ्याम् उपस्थितिः।
- 15.05.2021 दिनाङ्के श्रीरघुनाथकीर्तिपरिसरस्य (आधुनिकसंस्कृतसाहित्यसंसाधनकेन्द्रे) राष्ट्रियसङ्गोष्ठ्याम् पत्रवाचनम्, सह-संयोजकत्वेन चोपस्थितिः।
- 15.05.2021 दिनाङ्के श्रीरघुनाथकीर्तिपरिसरस्य (पाण्डुलिपिसंरक्षणानुसन्धानकेन्द्रे) राष्ट्रियसङ्गोष्ठ्यां पत्रवाचनम्, सञ्चालनञ्च।
- 21.05.2021 दिनाङ्कात् 22-05-2021 दिनाङ्कपर्यन्तं श्रीरघुनाथकीर्तिपरिसरे अन्तर्जालीयसाक्षात्कारस्य संयोजनम्।
- 05.06.2021 दिनाङ्के श्रीरघुनाथकीर्तिपरिसरे पर्यावरणदिवसस्य राष्ट्रियसङ्गोष्ठ्यां सह-संयोजकत्वेनोपस्थितिः।
- 06.06.2021 दिनाङ्के राष्ट्रियसंस्कृतमञ्चस्य राजस्थानप्रान्तस्य राष्ट्रियसङ्गोष्ठ्याम् उपस्थितिः।
- 06.06.2021 दिनाङ्के रा.सं.म. एवं सीटीईएस-कालेज-आफएजूकेशनइत्याभ्यां (चिकोडी,कर्नाटके) समायोजितायां राष्ट्रियसङ्गोष्ठ्याम् उपस्थितिः।
- 07.06.2021 दिनाङ्के 13-06-2021पर्यन्तं रा.सं.म. - गुवाहटीविश्वविद्यालयाभ्यां (असमे) समायोजितायां कार्यशालायाम् उपस्थितिः।
- 21.06.2021 दिनाङ्के श्रीरघुनाथकीर्तिपरिसरस्य (योगदिवसे) राष्ट्रियसङ्गोष्ठ्याम् उपस्थितिः।




## प्रतिस्पन्दः

श्रीरघुनाथस्य कृपया रघुनाथवार्तावली पत्रिकायाः अङ्कममुमवलोक्य नितरां मोमुद्यते मे मनः। कोरोनाकालेऽस्मिन् यत्र अध्ययनमध्यापनञ्चान्तर्जालीयमाध्यमेनाखिले विश्वे प्रचलति तत्रैतादृशी पत्रिका निरन्तरं प्रकाशिता वर्तते इति महत्प्रमोदस्थानम्। सर्वा परिसरस्याभिनवाः सूचना, रमणीयं साहित्यम्, प्राध्यापकानां गतिविधयः, समाचारपत्रेषु परिसरस्य स्थितिः एतत्सर्वं सचित्रं प्रकाशनं नूनं श्रीरघुनाथकीर्तिपरिसरस्य कीर्तिं विस्तारयति। यथा सर्वा पूजा अन्ते गोविन्दं प्रति गच्छति तथैव सर्वमिदं कार्यस्य यशः परिसरनिदेशकमेव याति।

अन्ते संस्कृतस्य, परिसरस्य, संस्कृत जगतश्च, नित्यं प्रचारः प्रसारश्च भवेत् इति कृतसङ्कल्पानां कृते सादरं मे प्रणामाः।



डॉ- केशवदेवः
(चण्डीगढतः)

विज्ञापन से भ्रमित न हों, सर्वोत्तम हेमपुष्पा ही लें

# संस्कृत विवि के निदेशक बने प्रो.बिश्वाल

देवप्रयाग | हमारे संवाददाता

प्रो. बनमाली बिश्वाल ने केंद्रीय संस्कृत विश्वविद्यालय के श्री रघुनाथ कीर्ति परिसर देवप्रयाग के नए निदेशक के रूप में पदभार ग्रहण किया। प्रो. बनमाली बिश्वाल परिसर के तीसरे निदेशक होंगे। इससे पूर्व प्रो. सर्वनारायण झा व प्रो.केबी सुब्बारायुडु निदेशक रहे थे।

मंगलवार को देवप्रयाग स्थित केंद्रीय संस्कृत विवि के रघुनाथ कीर्ति परिसर ... वैदिक मंत्रोच्चारण के साथ प्रो. ... बनमाली बिश्वाल ने नये निदेशक रूप ... पदभार ग्रहण किया। प्रो. बिश्वाल ... उड़िया, हिन्दी, अंग्रेजी सहित ... बांगला भाषाओं के विद्वान ... विधाओं पर उनकी 50 से



संस्कृत विवि के रघुनाथ कीर्ति परिसर के नए निदेशक प्रो. बनमाली बिश्वाल।

अधिक पुस्तकें व 150 शोधपत्र प्रकाशित हो चुके हैं और वह दस से अधिक पत्रिकाओं के संपादक हैं। ... और लेखक प्रो. बिश्वाल ... अधिक संगोष्ठि... शोधपत्र ...

पीएचडी कर चुके हैं। प्रो. बिश्वाल ... मॉडर्न संस्कृत साहित्यकार के रूप ... प्रसिद्ध हैं। दिल्ली संस्कृत अकादमी, ... उत्तर प्रदेश संस्कृत संस्थान, उत्तराखंड ... संस्कृत अकादमी आदि संस्थाओं ... एक दर्जन से अधिक पुरस्कार प्राप्त ... बिश्वाल विगत पांच वर्षों से इसी परिसर ... में व्याकरण विभागाध्यक्ष के ... सेवाएं दे रहे थे। वर्ष 20... संस्कृत संस्थान ... परिसर ...

## केन्द्रीय संस्कृत विश्वविद्यालय
## (शिक्षा मन्त्रालय के अधीन)

श्री रघुनाथ कीर्ति परिसर, देवप्रयाग (उत्तराखण्ड)-249301

**अतिथि शिक्षक हेतु ऑनलाइन साक्षात्कार-सूचना**

श्री रघुनाथ कीर्ति परिसर, देवप्रयाग (उत्तराखण्ड) द्वारा सत्र 2020-21 हेतु निम्नलिखित अतिथि अध्यापक पदों के आवेदन ऑनलाइन स्वीकार किये जाते हैं। आवेदन स्वीकार करने की अन्तिम तिथि प्रकाशित सूचना के 10 दिन तक रहेगी।

| क्र.सं. | विषय | पद संख्या |
|---|---|---|
| 1 | व्याकरण | 01 |
| 2 | ज्योतिष | 01 |
| 3 | वेद | 01 |
| 4 | न्याय | 01 |

इस सम्बन्ध में सभी प्रकार की विस्तृत सूचना हेतु परिसर की वेबसाइट www.csu-... इन कर देख सकते हैं।

संस्कृत-संवादः (पाक्षिकः) देहली

## श्रीरघुनाथकीर्तिपरिसरे समायोजिता विश्वपर्यावरणदिवसे राष्ट्रिया सद्गोष्ठी-





संस्कृतभारतीमेरठप्रान्तस्य ... सम्पन्नः ...

ऑक्सफोर्डग्रीनपब्लिकविद्यालयस्य वातावरणं संस्कृतमयमभवत्

सम्पूर्णानन्दसंस्कृतविश्वविद्यालय ...

... ध्यक्ष प्रो. विजय... शास्त्री, हंस फाउंडेशन के ... सुदर्शन गिरि गोस्वामी ...

केंद्रीय सं... रघुनाथ ... वेबिनार में ... चिंता जताई ... पर युवा... को रोक... ने पर ... प्रो. ... जिस ... हा है ... मिल...

... कर्मचारियों का उत्पीड़न किया जा रहा है। अब इस तरह की सेवा

## केंद्रीय संस्कृत विवि के निदेशक बने प्रो. बिश्वाल

देवप्रयाग। केंद्रीय संस्कृत विश्वविद्यालय श्री रघुनाथ कीर्ति परिसर के नए निदेशक प्रो. बनमाली बिश्वाल ने कार्यभार ग्रहण कर लिया हैं। वह परिसर के तीसरे निदेशक होंगे। इससे पहले प्रो. सर्वनारायण झा और उनके बाद प्रो. केबी सुब्बरायुडु परिसर के निदेशक रह चुके हैं।



प्रो. बिश्वाल ने कहा कि श्रीरघुनाथ कीर्ति परिसर'को देश के श्रेष्ठतम विश्वविद्यालयों के परिसरों की सूची में शामिल करना उनकी पहली प्राथमिकता रहेगी। प्रो. बिश्वाल संस्कृत, उड़िया, हिंदी और अंग्रेजी भाषाओं के विद्वान व मराठी और बांगला भाषाओं के जानकार हैं। ... विभिन्न विधाओं पर ... और

## युवाओं में बढ़ते नशे पर जताई चिंता

केंद्रीय संस्कृति विवि श्री रघुनाथ कीर्ति परिसर में हुआ वेबिनार

संवाद न्यूज एजेंसी

देवप्रयाग। केंद्रीय संस्कृत विश्वविद्यालय श्री रघुनाथ कीर्ति परिसर में आयोजित वेबिनार में देश में बढ़ते नशे पर चिंता जताई गई। वक्ताओं ने खासतौर पर युवाओं में बढ़ती नशे की आदत को रोकने के लिए ठोस कदम उठाने पर जोर दिया। परिसर निदेशक प्रो. केबी सुब्बारायुडु ने कहा नशा जिस तेजी से समाज में पांव पसार रहा है इसे रोकने के लिए सभी को मिलजुल कर प्रयास करने होगा। इस दौरान अध्यापकों, छात्रों और कर्मचारियों को जीवन में नशा न करने के लिए शपथपत्र भी भरवाए गए। वेबिनार में साहित्य विभागाध्यक्ष प्रो. विजयपाल शास्त्री, हंस फाउंडेशन के मर्जन सुदर्शन गिरि गोस्वामी, कार्यक्रम ... शर्मा, डॉ. वीरेन्द्र ...



वेबिनार में भाग लेते शिक्षक व छात्र।

प्रमाद उनियाल, डॉ. अरविंद सिंह गौर, डॉ. अनिल कुमार, डॉ. सुरेश शर्मा, डॉ. दिनेश चन्द्र पांडेय, डॉ. अवधेश बिजल्वाण, श्रीओम शर्मा, नवीन डोभाल ... संचार ...

## केंद्रीय संस्कृत विवि के नए निदेशक बने प्रो. बिश्वाल

श्रीरघुनाथ कीर्ति परिसर, देवप्रयाग के तीसरे डायरेक्टर के रूप में पदभार संभाला

सड़क सुर... निकाली मोट...

यहाँ अध्ययनरत छात्र-छात्राओं सहित

